Vaidyasarathy Series. Book No. 10.

CHIKITSA KALIKA
OF
TISATACHARYA.

Edited by
VAYASKARA N. S. MOOSS.

Published by the Proprietor,
Vaidyasarathy Press, Kottayam.
1950.

Price Rs. 2/- 4/50

तीसटाचार्यविरचिता

चिकित्साकलिका ॥

अष्टाङ्गदङ्कारवयस्करार्य-
नारायणस्यात्मभुवा मयाऽद्य ।
योगैश्चिकित्साकलिकेव सूनैः
स्रक्शोधिता शङ्करशर्मणेयम् ॥

कोट्टयनगर्यां
वैद्यसारथिमुद्रणालयाधिपतिना
स्वीये मुद्रणालये मुद्रापयित्वा प्रकाशिता ।

कोळंबाब्दः ११२५. क्रिस्ताब्दः १९५०

मूल्यं रूप्यकद्वयम् ।

PREFACE.

No scientific history of Indian medicine can be written without the critical editions of the extant medical treatises, published or unpublished. This fact is being increasingly recognised by Indian physicians with academic bent of mind in the different provinces of India and they have been struggling to produce such critical editions by collecting manuscripts from all available sources private or public. Among such physicians by whose labours I have profited I may mention Sri Jadavji Trikamji Acharya of Bombay, Shri Harisastri Paradkar of Akola and Shri N. S. Mooss of Kottayam (South India). Side by side with their life-long service to the suffering humanity as practising Ayurvedic physicians they have rendered valuable service to the cause of Indian medicine by publishing critical editions of medical texts, which I have been using constantly for my own studies pertaining to the history of Indian medical literature and allied subjects.

I have no knowledge of the practical side of Indian medicine and consequently I don't possess any competence to write a Preface to the present edition of the *Cikitsakalika* by my esteemed friend Shri N. S. Mooss except my authorship of numerous papers dealing with the history of Indian medical authors and their works as also the history of allied subjects like the history of Indian plants of medical and nutritive value, history of Indian *Gandha Sastra* (cosmetics and perfumery), history of dietetics, history

of health and hygiene (vide my papers on the history of hospitals, Soap and Soap-nuts, Mosquito-curtain etc). The only Introductions to medical texts I have so far written are (1) Introduction to the *Ashtanga-hridaya* edited by Shri Hari Sastri Paradker and (2) the Introduction to the edition of the *Carakasamhita* that is being edited by my learned friend Dr. P. M. Mehta of Jamnagar, the great benefactor of Ayurveda and founder of an Ayurvedic College there some years ago.

Though I have been using the publications edited by Shri N. S. Mooss for several years my close contact with him really began about five years ago. This contact has now increased considerably and hence warrants my present Preface to his edition of the *Cikitsakalika*. In fact it is a pleasure and privilege to be associated with the literary labours of a sincere learned friend like Shri Mooss, who belongs to a notable house of physicians in Kerala and has published several books pertaining to Indian medicine.[1]

---

[1]
1. Ashtanga Hridaya—Uttara Sthana with the Kairali Commentary.
2. Abhidhana Manjari of Bhishagarya.
3. Pathya Vyakhya of Ashtanga Hridaya.
4. All India Ayurvedic Directory.
5. Tantra Yukti.
6. Ashtanga Hridaya Samhita with the Vakya-pradeepika Vyakhya.
7. Vaidya Manorama or Chikitsakrama.
8. Ayurvedic Treatments of Kerala.

As one interested in the chronology of Indian medical authors I may record here the views of scholars about Tisata, the author of the *Cikitsakalika* and his son Candrata, the author of some medical works. A. F. R. Hoernle has recorded the results of his chronological researches about Indian medical authors and their works in his *Osteology*, Oxford, 1907, pages 7 to 17 and in *J. R. A. S.* 1906, pages 283 to 302 etc. These researches of Hoernle and his followers have been examined by Prof. Dinesh Chandra Bhattacarya [2] in his recent article "*New Light on Vaidyaka Literature*" (pages 123 to 155 of *Indian Historical Quarterly*, June 1947).

Prof. Bhattacarya considers all these researches as "a hopeless muddle" worthy of being "entirely rejected".

According to Hoernle the date of Candrata is "*about A.D. 1000*" (page 100 of *Osteology*) but according to Bhattacarya Candrata flourished *about*

---

[2] On p. 153 of his article in the I. H. Q. (June, 1947) Bhattacarya records his tentative scheme of Chronology of medical authors as follows:-

Before A.D. 600 — Bhattara Haricandra
Between A.D. 600 and 900 — *Ayurvedasara, Bindusara Siddhasara etc.*
About A.D. 850 — Vagbhata (He cannot have flourished before A.D. 800)
About A.D. 950 — Candrata.
A.D. 975-1000 — Vrndakunda and Cakrapanidatta *A.D. 1040-50.*

A.D. 950 and his father Tisata can be assigned to "*about 900 A.D.*"[3] (p. 152). Tisata's father was a most distinguished physician as stated by his son Candrata. In the colophons[4] of many mss. of the *Cikitsakalika* Tisata is described as the son of the great Vagbhata (Peterson, *Ulwar Cata.* p. 69 and *B. O. R. I. XVI* (*Vaidyaka* Mss.), pp. 170-175).

In his Sanskrit Introduction to the present edition of the *Cikitsakalika* Sri Mooss has dealt with the nature and importance of this medical treatise. He has also described the five manuscripts on which he has based his edition. Of these manuscripts two belong to the Govt. Manuscripts Library at

---

[3] Niscalakara (about A.D. 1110-1120) mentions *Tisata* among authors from whom Cakrapanidatta borrowed. According to D. C. Bhattacarya Cakrapanidatta flourished about A.D. 1040-1050. *Tisata* is, therefore, earlier than C. A.D. 1000. If Candrata is assigned to about A.D.950 his father *Tisata* can be reasonably assigned to "about 900 A. D." as suggested by Bhattacharya.

[4] The Colophons of Mss. unless they are contemporary, are not dependable sources of evidence. It is, therefore, open for investigation (1) whether Vagbhata was really the name of Tisata's father and (2) whether this Vagbhata was identical with Vagbhata, the author of *Astangahridaya*, as suggested by Bhattacarya according to whom one Vagbhata was the author of both the *Astangasamgraha* and the *Astangahrdaya* (vide Annals, B. O. R. Institute, Vol xxviii, pp. 116).

the B.O.R. Institute, Poona, while the remaining three belong to Shri Mooss, Tanjore Library and Shri V. R. Bhat of Shertalai respectively. Within the limits of this manuscript material and in the light of his own knowledge of medicine Shri Mooss has tried his best to give us a readable text. If any old and important manuscripts of the *Cikitsa-kalika* become available to Shri Mooss hereafter they will be utilised by him for a Second edition of this text. Lovers of Ayurveda who possess such manuscripts will do well to lend out these manuscripts to Shri Mooss.

In concluding this brief Preface, I have to thank Shri Mooss cordially for giving me an opportunity to associate myself with his literary labours and to convey to him my warm congratulations upon his successful completion of the present critical edition of the *Cikitsakalika* which stands on the threshold of rational medicine illumining a thousand years of the history of the *Ayurveda* on either side.

Bhandarkar Oriental
Research Institute,
Poona 4.
8th May 1950.

P. K. GODE.

प्रस्तावना ॥

औषधयोगप्रतिपादकग्रन्थसमूहेष्वेषा चिकित्साकलिका कुसुमनिचयरसास्वादवदतिमधुरैर्वंशस्थमालिनीवसन्ततिलकादिविविधवृत्तैरुपनिबद्धा चरकाचार्यादिचिकित्सितोपदेशचतुरा प्रासानुप्रासादिशब्दालङ्कारनिचिता प्रायेणाष्टाङ्गप्रतिपादका ज्वरादिहेतुलिङ्गौषधस्कन्धत्रयमात्रनिबद्धा भाति । फलसिद्धिदैः सारभूतैर्विविधैरौषधयोगैरुपनिबद्धत्वादेषा चिकित्साकलिका भिषजामध्येतॄणां कलिकालाकलितमालिन्यमलिनेऽस्मिन् लोके कलिकलापोन्मूलनं कृत्वा कल्यतामाकलयितुमतीवोपयुक्ता ॥

"एषा चिकित्साकलिका सदर्थगन्धा भिषक्षट्पदवृन्दसेव्या । निरूपिता वृत्तशतैश्चतुर्भिर्योगैः स्रगब्जैरिव तीसटेन ॥" इति ग्रन्थावसाननिर्दिष्टात् पद्यात् ग्रन्थस्यास्य परिमाणं श्लोकचतुश्शतमिति ज्ञायते । श्लोकसंख्या तु विविधेष्वादर्शपुस्तकेषु किञ्चिन्न्यूनाधिकतया विभिन्ना वर्तते ॥

अस्याश्चिकित्साकलिकायाः कर्ता सम्यगधीतायुर्वेदशास्त्रार्थः काव्यालङ्कारादिष्वद्वितीयो विमलविपुलबुद्धिश्चिकित्साशास्त्रपारावारपारीणः क्रियासिद्धस्तीसटनामा कश्चित् भिषग्वर इति ग्रन्थारंभनिर्दिष्टेन सूर्याश्विधन्वन्तरीत्यादिश्लोकेनानुमीयते । ग्रन्थस्यास्य संशोधनार्थं पुण्यपत्तनस्थात् भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरादानीतस्य चिकित्साकलिकायाः कस्यचिदादर्शग्रन्थस्यादिमभागे तु "वाग्भटसूनुना तीसटेन विरचित"मिति किञ्चिद्विवरणं वर्तते तत्कर्तारं प्रति । ग्रन्थस्यावसाने तु "इति वाग्भटसूनुना तीसटदेवेन रचितं चिकित्साशास्त्र"मिति च लिखितमस्ति । मन्यामहे वयं हेतुनानेन वाग्भटनामग्रहणेनाष्टाङ्गहृदयसंहिताकर्ता वाहटनामाचार्य एवानुमीयत इति । मतमेतत् डाक्टर आफ्रेच्टमहोदयैरप्यङ्गीकृतम् ॥

एषा चिकित्साकलिका चतुर्वर्गचिन्तामणिविधायिनाऽचार्येण हेमाद्रिणा स्वविरचितायामष्टाङ्गहृदयव्याख्यायां विजयरक्षिताचार्येण स्वविरचितायां मधुकोशाख्यायां माधवनिदानव्याख्यायां वीरसिंहेन स्वरचिते वीरसिंहावलोकननाम्नि ग्रन्थे च बहुष्वपि प्रदेशेषु स्मृता । हेमाद्रिस्तु देवगिरिमहाराजस्य

रामचन्द्रस्य स्मरणमपि कृतं स्वरचितायामष्टाङ्गहृदयव्याख्यायाम् । अतो हेतोर्हेमाद्रिव्याख्यानस्य रचनाकाल: १२७१ क्रिस्तीयवर्षस्यानन्तरं १३०९ वर्षस्यार्वागिति चरित्रान्वेषका ब्रुवते । श्रीविजयरक्षितो वीरसिंहश्च कस्मिन् काले समजनिषातामिति निश्चयेन वक्तुं न शक्नुवाम: । चिकित्साकलिकाया: श्लोकोद्धारणेन तेषां पौर्वकालिकत्वं तीसटाचार्यस्य निर्णेतुं शक्यते । Dr. होर्णेल् महोदया अष्टाङ्गसंग्रहकर्ता वाहटोऽष्टाङ्गसंग्रहकारात् भिन्न आसीदिति स्वमतं प्रदर्श्य संग्रहकर्ता वाहट: क्रिस्तीय ६२५ वर्षसमीपे हृदयकर्ता वाहट: क्रिस्तीयेऽष्टमे नवमे वा शताब्दे समजायत इति निर्दिशन्ति । इन्दुरुणदत्तादिभिर्व्याख्यातृभि: संग्रहहृदययोरेककर्तृत्वं स्पष्टीकृत्योक्तत्वादेतन्मतं सर्वथा प्रामादिकमेवेति बुद्ध्यामहे । सांप्रतं खलु संग्रहकारो वाहट एव हृदयकार इत्यत्र नास्ति न: स्तोकोऽपि सन्देह: । आचार्यो वाहट: कस्मिन् काले संबभूवेति विषये भिन्नभिन्नानि मतानि प्रदर्शितानि वर्तन्ते । Dr. होर्णेल्महोदयानां वाहटकालनिर्णायकं मतमङ्गीकृत्य विचारिते सति तीसटो नाम कश्चित् पुत्रो वाहटस्याभविष्यद्यदि स क्रिस्तीय ६२५ संवत्सरसमीपे समजायत इति निर्णेतुं शक्यते । तीसटस्य जीवितकालव्यवच्छेदने चरित्रान्वेषका एव प्रमाणमिति मन्यमाना वयमेतस्माद्विषयाद्विरमाम: ॥

पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्य प्रधानाध्यक्षपदवीमधितिष्ठता श्री पी. के. गोडे महाशयेन तीसटकालनिर्णयप्रदर्शनपरं वृत्तं पुरस्कृत्याङ्गलभाषायां रचित उपोद्घातोऽप्यस्मिन् ग्रन्थे संयोजित: । सोऽपि सम्यक् समालोक्यताम् ॥

तीसटाचार्यसूनुना चन्द्रटाचार्येणास्याश्चिकित्साकलिकाया: काचिट्टीका विरचितेति ज्ञायते । खिद्यते नश्चेत एतन्निवेदयितुं यच्चन्द्रटकृता व्याख्यैतत्पर्यन्तं नोपलब्धाऽस्माभिस्तदासादयितुं यत्न: कृतोऽपि । येषां महोदयानां निकटे चिकित्साकलिकाया: काचिद्व्याख्या भवेत् तर्हि कृपया तदस्मभ्यं निवेदनीयमिति च प्रार्थयाम: सर्वेभ्य: सज्जनेभ्य: ॥

ग्रन्थस्यास्य संशोधनार्थमानीतानि पञ्च हस्तलिखितानि पुस्तकानि । तेषामैतिहासिकं वृत्तं प्रथमे सूचिपत्रे निर्दिष्टम् । एतेष्वादर्शपुस्तकेषु

वर्तमानानि पाठान्तराणि तत्तद्धस्तलिखितपुस्तकसंज्ञासहितानि टिप्पण्यामुक्तानि ॥

अस्य संशोधनकर्मण्यस्मभ्यमनल्पं प्रदत्तं साहाय्यं पण्डितवर्यैरस्मत्परमसुहृद्भिश्चेप्पाट्टुदेशवासिभिरच्युतवार्यैः, मद्गुरुशिष्यैः केरळपुरवास्तव्यै रुद्रवार्यैश्च । संशोधयन्तु विद्वांसो यत्नेन संशोधितेऽस्मिन् ग्रन्थे मतिमान्द्यादनवधानाद्वा प्रमादिदोषः क्वचित् सञ्जातो भवति चेत् तमिति सविनयमभ्यर्थयामो वयम् ॥

कोट्टयम्,
१-७-१९५० ।

भिषजां विधेयः
शङ्करशर्मा ।

सूचिपत्रम् २ ।

चिकित्साकलिकायाः संशोधनार्थमानीतानां हस्तलिखितपुस्तकानां संक्षिप्तवृत्तदर्शकं सूचिपत्रम् ॥

१. **कग्रन्थः** । मूलमात्रम् । अस्मत्संगृहीतमिदं पुस्तकम् । परिपूर्णं प्रायेण परिशुद्धं च । ग्रन्थावसाने त्वयं लेखः— "इति चिकित्साकलिका समाप्ता" ॥

२. **खग्रन्थः** । मूलमात्रम् । पृष्ठानि १– १९ । पुण्यपत्तनस्थस्य भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्येदं पुस्तकम् । पुस्तकक्रमांकः ९१५/१८८४– ८७ । पुस्तकस्यान्ते त्वयं लेखः— "एषा चिकित्साकलिका सदर्थगन्धा भिषक्षट्पदवृन्दसेव्या । निरूपिता वृत्तशतैश्चतुर्भिर्योगैः स्रगञ्जैरिव तीसटेन ॥ जातैर्विशाला वहुसुश्रुतादिशास्त्रोदधौ योगविशेषरत्नैः । आस्तां चिरं सद्गुणकण्ठिकेव कण्ठे स्थिता वैद्यमहीपतीनाम् ॥ इति श्रीतीसटसूत्रं समाप्तम् ॥"

३. **गग्रन्थः** । मूलमात्रम् । पृष्ठानि १– १७ । पुण्यपत्तनस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरादानीतमिदं पुस्तकम् । ग्रन्थावसाने त्वयं लेखः— "सुरतरुकृतमालो व्यालदार्वीकरालस्तपनफलगणालोद्धाङ्गगौरीविशालः । विहितशशिकलार्द्धः सेव्यमानोऽतिभक्त्या पशुपतिरिव चूर्णः सर्वकुष्ठानि हन्यात् ॥ ४२२ (प्रामादिकोऽयं श्लोकः) । इति वाग्भटसूनुना तीसटदेवेन विरचितं चिकित्साशास्त्रम् । अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥ इति चिकित्साकलिका समाप्ता ।" पुस्तकक्रमांकः २१४/A. १८८३– ८४ । लेखनकालस्तु "२२–९–९१" ॥

४. **घग्रन्थः** । मूलमात्रम् । तञ्चावूर्नगरस्थमहाराजसर्फोजीसरस्वतीमहाल्यग्रन्थालयस्यादर्शपुस्तकात् प्रतिलिपिं कारयित्वाऽनीतमेतदस्माभिः । ग्रन्था-

वसाने तु लेखः— "जाता विशाला बहुसुश्रुतादिशास्त्रोदधेः योगविशेषरत्नः । आस्तां चिरं सद्गुणकर्णिकेव कर्णे स्थिता वैद्यमहीपतीनाम् ॥ इति वाजीकरणतन्त्रम् । इति चिकित्साकलिका समाप्ता "। प्रायेण खग्रन्थसमानमिदम् ॥

५. ङग्रन्थः । मूलमात्रमपरिपूर्णं च । चेर्तलनिवासिनां वि. आर. भट्टमहाशयानां तालपत्रात्मकं कैरळ्यक्षरैर्लिखितमिदं पुस्तकम् । ग्रन्थान्ते त्वयं लेखः— "विभीतकत्वङ्मलयूजटानां क्वाथेन पीतं गुडसंयुतेन । आवल्गुजं बीजमपाकरोति श्वित्राणि कृच्छ्राण्यपि पुण्डरीकम् "॥ प्रायेणाशुद्धं लेखकप्रमादादिदोषबहुलं च ॥

विषयानुक्रमणिका ।

॥ श्रीः ॥

तीसटाचार्यविरचिता

॥ चिकित्साकलिका ॥

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ॥

[1]सूर्याश्वि[2]धन्वन्तरि’सुश्रुतादीन्
भक्त्या नमस्कृत्य [3]पितुश्च’ पादान् ।
कृता चिकित्साकलिकेति [4]योगै-
र्माला सरोजैरिव तीसटेन’ ॥ १ ॥

हारीतसुश्रुतपराशरभोजभेड-
भृग्वग्निवेशचरकादि[5]चिकित्सितोक्तैः’ ।
एभिर्गणैश्च गुणवद्भिरतिप्रसिद्धै-
[6]र्द्धीन्व’न्तरीयरचनारुचिर[7]प्रबन्धैः’ ॥ २ ॥

[8]स्वल्प’श्रुतस्य भिषजः किल सुश्रुतादि-
शास्त्रोदधौ मतिरबोधदृढप्रमूढा ।
अस्मद्विधग्रथितयोगसमुच्चये तु
[9]बध्नाति’ बुद्धिमबुधः सुभिषग्[10]वरो वा’ ॥ ३ ॥

यद्भूपयःशिखिसमीरवियद्भिरेभि-
र्भूतैर्गुणैरपि च सत्वरजस्तमोभिः ।

---

१ ‘प्रणम्य पाराशर’ ग. । २ ‘धान्वन्तरि’ ङ. । ३ ‘चतुश्च’ ? ङ. । ४ ‘सभि-
भीष्टाः? सन्निविष्टा’ ङ. । ५ ‘चिकित्सकोक्तैः’ ङ. । ६ ‘र्द्धन्व’ घ. । ७ ‘प्रपञ्चैः’ ख. ।
प्रपन्नैः’ घ. । ८ ‘अल्प’ ग. । ९ ‘बध्नातु’ ग. ङ. । १० ‘वरोऽन्न’ ग. ।

त्वग्दोष[1]धातुमलमर्मसिरादिभिश्च[2]
व्याप्तं वपुस्तनुभृतामिदमत्र रोगाः[3] ॥ ४ ॥
ते वातपित्तकफजास्त्रिविधा द्विधा च[4]
काये मनस्यपि च सन्त्यपरे नराणाम् ।
साध्याः क्वचित् क्वचिदपि प्रभवन्ति याप्याः
केचित्[5] पुनः क्वचिदसाध्यतमाः प्रदिष्टाः ॥ ५ ॥
एकैकदोषजनिता निरुपद्रवाश्च
दीप्तानलस्य च सदात्मवतश्च जन्तोः ।
वित्तान्वितस्य च रुजः सदुपक्रमेण
साध्या भवन्ति भिषजामचिरोद्भवा[6] ये ॥ ६ ॥
ये यावदेव भिषजामगदप्रयोगा-[7]
स्तावत्प्रशान्तिमुपयान्त्यगदैर्विना ये ।
प्रादुर्भवन्ति च पुनः सहसा द्विदोषा-
स्तादृग्विधाः स्युरिति याप्यतरा गदास्ते[8] ॥ ७ ॥
ये कर्मजाः सह भवन्ति शरीरिणां ये[9]
ये च त्रिदोषजनिताश्चिरकालजाश्च[10] ।
सोपद्रवाश्च्युतधनस्य च ते गताक्ष-
रुग्रा गदा गदवतामगदैरगम्याः ॥ ८ ॥
कर्मप्रकोपेण कदाचिदेके
दोषप्रकोपेण भवन्ति चान्ये ।
तथाऽपरे प्राणिषु कर्मदोष-
प्रकोपजाः कायमनोविकाराः ॥ ९ ॥
जठरगुदजोन्मादापस्मृत्यसृक्च्युति[11]पंगुता-
श्रुति[12]विकलतावाग्वैकल्यप्रमेहभगन्दराः ।

---

१ 'तद्दोष' ङ. । २ 'सिराभिराभिर्व्याप्तं' ख. । ३ 'रोगः' ख. । ४ 'वा' ख. घ. । 'तु' ङ. । ५ 'केचित् क्वचित् पुनरसाध्य' ख. घ. ङ. । ६ 'द्रुताश्च' ग. । 'द्रवाश्च' घ. ङ. । ७ 'प्रयोगै' ङ. । ८ 'तमाः प्रदिष्टाः' ख. । 'तमा गदास्ते' ङ. ९ 'हि' घ. ।१० 'ये' ङ. ।११ 'स्रुति' ङ. ।१२ 'श्रुत' ख.। 'त्वचि' ङ. ।

प्रदरपवनव्याधिश्वित्रकृच्छ्र[1]क्षणदान्धता-
तिमिरवदनघ्राणाशांसि श्वयथ्वपचीव्रणाः[2] ॥ १० ॥

[3]वल्मीककाकणकशंखकपुण्डरीक-
रक्तार्बुदव्रणविसर्पवपुःप्रकंपाः ।
पक्षाभिघातगलगण्डगलग्रहाद्य[4]
दण्डापतानकसमीरणशोणिताद्याः ॥ ११ ॥

इत्यामयाः स्युरपर[5]द्रविणापहार-
गुर्वङ्गनागमनविप्रवधादिभिर्यैः ।
दुष्कर्मभिस्तनुभृतामिह कर्मजास्ते
नोपक्रमेण भिषजामुपयान्ति सिद्धिम् ॥ १२ ॥

दानैर्दयादिभिरपि[6] द्विजदेवताग्नि-[7]
[8]गुर्वर्चन[8]प्रणतिभिश्च जपैस्तपोभिः ।
इत्युक्तपुण्यनिचयैरपचीयमानाः
[9]प्राक्पापजा यदि[9] रुजः प्रशमं प्रयान्ति ॥ १३ ॥

[10]स्वहेतु[10]दुष्टैरनिलादिदोषै-
रुपप्लुतैः[11] खेषु[11] परिस्खलद्भिः ।
भवन्ति ये प्राणभृतां विकारा-
स्ते दोषजा भेषजे[12]सिद्धि[12]साध्याः ॥ १४ ॥

दानादिभिः [13]कर्मभिरोषधीभिः[13]
कर्मक्षये दोषपरिक्षये च ।
सिध्यन्ति ये यत्नवतां [14]कथञ्चि[14]-
त्ते कर्मदोषप्रभवा वि[15]काराः[15] ॥ १५ ॥

---

१ 'क्षय' ख. ङ. । २ 'पचिव्रणाः' ख. घ. ङ. । ३ 'बाल्मीक' ख. । ४ 'द्या' ङ. । ५ 'परे' ङ. । ६ 'याभिरपि च' ख. घ. । ७ 'ताग्नि ङ. । ८ 'गुर्वर्चना' ङ. । ९. 'प्राक्कर्मजा यदि' ङ. । १० 'स्वदेह' घ. । ११ 'प्लुतैरेव' ङ. । १२ 'जशुद्धि' ग. घ. । 'जसिद्ध' ङ. । १३ कर्मभिरौषधीभिः' ख. ग. । १४ 'कदाचि' घ. । १५ 'गदास्तु' ङ. ।

[1]दोषप्रदेश'बलकालविकारसत्त्व-
[2]सात्म्यौष'धानलवयःप्रकृतीः [3]परीक्ष्य' ।
नानाप्रकारपवनादिगदातुराणा-
[4]मुक्तं' चिकित्सितमिदं न तु कर्मजानाम् ॥ १६ ॥

वातादयः पूर्वमुदाहृता ये
दोषाः शरीरे[5]षु' शरीरिणां [6]हि' ।
वातस्त्वधस्ताद्वपुषश्च मध्ये
पित्तं कफश्चोर्ध्वमिति स्थितास्ते ॥ १७ ॥

रसश्च रक्तं पिशितञ्च मेद-
[7]स्त्वस्थीनि' मज्जा त्वथ शुक्रमेते ।
स्युर्धातवः सप्त तथा मलाश्च
विण्मूत्रमुख्या मुनिभिः प्रदिष्टाः ॥ १८ ॥

दोषेषु धातुषु मलेषु समेषु सत्सु
साम्यं भवेदिह नृणामसमेष्वसाम्यम् ।
यस्मादतः समतया प्रयतेत तेषा-
मेतच्चिकित्सितरहस्यमुदाहरन्ति ॥ १९ ॥

नाभेरधः प्रसृतयो दश यान्त्यधस्ता-
दूर्ध्वं [8]गताः प्रसृतयो' दश तद्वदेव ।
द्वे द्वे सिरे प्रवितते प्रसृते च तिर्य-
[9]ग्युक्ता' चतुर्भिरिति विंशतिरत्र काये ॥ २० ॥

द्वादशभिर्द्विगुणाभिरमूभि-
र्व्याप्तमिदं नृशरीरमशेषम् ।
आभिरमी कफपित्तसमीरा-
[10]स्ते वपुषि प्रसरन्ति सिराभिः' ॥ २१ ॥

---

१ 'तद्दोषदेश' ङ. । २ 'साध्यौष' घ. । 'सात्मौष' ङ. । ३ 'समीक्ष्य' ख. ङ. । ४ 'श्चोक्तं' ग. । ५ 'तु' ङ. । ६ 'वै' ङ. । ७ 'श्चास्थीनि' ङ. । ८ 'कृतानुसृतयो' ग. घ. । ९ 'गुप्ता' ङ. । १० 'देहभृतां प्रसरन्ति शरीरे' ग. घ. ङ. ।

आसाञ्च[1] सूक्ष्मसुषिराणि शतानि सप्त
स्युस्तानि[2] यैरसकृदन्नरसं वहद्भिः ।
आप्यायते[3] वपुरिदं हि नृणाममीषा[4]-
मंभः स्रवद्भिरिव सिन्धुशतैः समुद्रः ॥ २२ ॥

आपादतः प्रभृति गात्रमशेषमेतं-
दा मस्तकादपि च नाभिभुवस्स्रुतेन[5] ।
एतन्मृदङ्ग इव चर्मचयेन नद्धं[6]
सम्यङ्[7] नृणामिह[8] सिराशतसप्तकेन ॥ २३ ॥

तेनानुगम्य वपुरेतदनेन दोषाः
कुर्वन्ति कायकुपिताः पवनादयोऽमी ।
रोगानशेषवपुषि त्वथवा[9]ऽङ्गगात्रे
शाखासु वा क्वचिदथावयवान्तरेषु ॥ २४ ॥

भूतानि कर्माणि च दोषधातु-
मलास्तथा सप्तसिराशतानि ।
प्रोक्तानि मर्माणि च हृद्गुदश्च
नाभिस्त्विति त्रीण्यपरैः किमुक्तैः ॥ २५ ॥

गुणत्रयं सत्वरजस्तमांसि
हृदि स्थितान्यत्र मनोविकाराः ।
नाभिप्रदेशाच्च[10] सिराः प्रवृत्ता
गुदे प्रधानान्त्रममुत्र बद्धम् ॥ २६ ॥

अतः प्रधानानि भवन्त्यमूनि
हृन्नाभिपायूनि नृणाममीषाम् ।
एतन्मयं प्रोक्तमिदं शरीर-
मिति प्रकाशीकृतमल्पमात्रम् ॥ २७ ॥

---

१ 'न्तु' ङ. । २ 'भूतानि' ग. । ३ 'आपूर्यते' ख. घ. ङ. । ४ 'षामा' ख. घ. । ५ 'वस्तु तेन' ङ. । ६ 'विद्धं' ख. । 'सम्यक्' घ. । 'बद्धं' ङ. । ७ 'गात्रं' ग. ङ. । 'बद्धं' घ. । ८ 'णामिति' ङ. । ९ 'चा' ग. । १० 'आनाभिदेशाच्च' ख. । 'आनाभिदेशात्तु' ङ. ।

वातस्य पित्तस्य कफस्य [1]चापि'
विकारिणः[2]' कायवतां हि काये ।
प्रकोपहेतुः कुपितस्य लिङ्गं
चिकित्सितं चेति [3]निरूपणीयम्' ॥ २८ ॥

रूक्षै[4]स्तिक्तैः' कषायैः कटुभिरनशनै-
र्वेगसन्धारणैश्च
व्यायामैश्च व्यवायैः प्रतरणबलव-
द्विग्रहैर्जागरैश्च ।
श्यामानीवारकंगुप्रभृतिभिरशनै-
रुल्लसद्भिः पयोदै-
रन्ने जीर्णे च [5]जन्तोर्निशि' भवति तनौ
मारुतस्य प्रकोपः ॥ २९ ॥

कट्वम्लोष्णविदाहितीक्ष्णलवण-
क्रोधोपवासातप-
स्त्रीसंपर्कतिलातसीदधिसुरा-
शुक्तारनाळादिभिः ।
भुक्तैर्जीर्यति [6]भोजने' [7]च शरदि'
ग्रीष्मे सति प्राणिनां
मध्याह्ने च तथाऽर्ध[8]रात्र'समये
पित्तप्रकोपो भवेत् ॥ ३० ॥

गुरुमधुरातिशीतदधिदुग्ध[9]नवान्न'पय-
स्तिलविकृतीक्षु[10]भक्ष्य'[11]लवणातिदिवा'शयनैः ।
समविषमाशनाध्यशनपायसपिष्टकृतै-
रपि च कफः प्रकुप्यति मधौ च दिनादिषु च ॥ ३१ ॥

---

१ 'वाऽपि' ग. घ. । २ 'णां' ङ. । ३ 'प्ररूपणीयम्' ख. । ४ 'स्तीक्ष्णैः' ग. । ५ 'जन्तोरिति' ग. घ. ङ. । ६ 'चाशने' ङ. । ७ 'शरदि च' ख. घ. ङ. । ८ 'रात्रि' ख. ङ. । ९ 'भवान्न' ख. । १० 'भक्ष' ख. ङ. । 'भक्त' ग. । ११ 'ल्वणदिवाति' घ. ।

इति प्रकोपकारणैः प्रकोपमेत्य सर्वगाः[1]।
समीरणादयश्च ते[2] रुजः[3] सृजन्ति जन्तुषु ॥ ३२ ॥

वातपित्तकफकोपलक्षणं
सूत्रितं[4] यदिह सूत्रसंग्रहे ।
प्रोच्यते तदिह[5] सांप्रतं मया
रुक्परीक्षण[6]मनेन कारयेत् ॥ ३३ ॥

दृशि शिरसि च शङ्ख[7]श्रोत्रनेत्रान्तरेषु
भ्रुवि हृदि हनुमन्यास्कन्धमूर्धादि[8]सन्धौ ।
रुगति निशि दिवाऽल्पा स्यादकस्मात्[9] प्रशान्ति[10]-
र्भवति [11]हि भुजजङ्घास्त[12]ब्धसङ्कोचता च ॥ ३४ ॥

कटिविटपयकृत्सु क्लोम्नि च प्लीह्नि पृष्ठ
जठरवृषणवक्षःकुक्षिकक्षान्तरेषु[13] ।
प्रसरति गुरु शूलं नाभिवस्तिस्तनेषु
त्रिकगुदवलिगुह्योपान्तपक्षद्वयेषु ॥ ३५ ॥

वदनविरसता स्याद्वर्चसः[14] कर्कशत्वं
भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः ।
त्वचि च[15] परुषता स्यात् स्याच्च वैषम्यमग्ने-
रिति पवनविकारे लक्षणं प्रोक्तमेतत् ॥ ३६ ॥

भ्रममदमुखशोषस्वेदसन्तापमूर्च्छा-
मुखनख[16]नयनत्वङ्मूत्रविट्पीतता च ।
[17]प्रलपनमतिसारश्चारुचिश्च ज्वरश्च

---

१ 'सर्वथा' ख. । २ 'स्तनौ' ख. घ. ङ. । ३ 'सृजन्तु' ख. । ४ सूचितं' ख. । ५ 'तदपि' ख. । ६ 'रुग्विनिर्णय' ङ. । ७ 'शंखे' ग. । ८ 'मूर्द्धार्द्धं' ख. ग. घ. ङ. । ९ 'स्माच्च शान्तिर्भवति' ङ. । १० 'प्रशान्ता भवति' ख. घ. । ११ 'च' ङ. । १२ 'स्कन्ध' ङ. । १३ 'क्षाक्षकेषु' ख. । १४ 'द्वचसः' घ. । १५ 'तु' ङ. । १६ 'नयननख' ख. । १७ 'प्रलग्नमतिसारश्चारुचिश्च' घ. । 'वमनमतिसरत्वश्चारुचिश्च' ङ ।

तृडति 'शिशिरेच्छा स्यात्' पित्तरोगस्य लिङ्गम् ॥ ३७ ॥

अङ्गस्य गौरवमपाटवमन्तराग्ने-
रुत्क्लेशता च हृदयस्य मुखे प्रसेकः' ।
'आलस्य'मास्यमधुरत्वमकाण्डकण्डू-
रापाण्डुता नयनयोरति रोमहर्षः ॥ ३८ ॥

प्रज्ञाप्लुतिर्वमथु'पीनसकासतन्द्रा-
निद्रादय'श्चुलुचुलायनमुल्बणश्च ।
स्यादोष्ठकण्ठरसनारदतालुमूल-'
घ्राणे'क्षणश्रवणशाष्कुलिकान्तरेषु ॥ ३९ ॥

श्लेष्मोद्भवे' भवति लिङ्गमिदं विकारे
संसर्गजेषु च गदेषु भवद्विदोषम् ।
जन्तोरिदं पवनपित्तकफप्रकोप-
लिङ्गं त्रिदोषजरुजि प्रविभज्य योज्यम् ॥ ४० ॥

उद्देशमात्रमपि' लक्षणमेतदुक्तं
व्यक्तिं' व्यनक्ति पवनादिगदातुराणाम् ।
नृणामदृष्टचरकादिजडात्मनोऽपि
प्रज्ञावतः किमुत कायचिकित्सिकस्य' ॥ ४१ ॥

प्राक्प्रोक्त'भेषजगणैरगदैर्गदेषु
कुर्यात् क्रियां कथ'मलक्षितलक्षणेषु ।
सर्वत्र शास्त्रकुशलैरुपलब्धलिङ्गै'
'रोगैर्भि'षग्भवति भेषजसिद्धकर्मा ॥ ४२ ॥

---

१ 'शिशिरतेच्छा' ख. ङ. । 'च शिशिरे स्यात्' ग. । २ 'मुखप्रसेकः' ख. घ. । ३ 'सालस्य' ग. । ४ 'मन' ख. । ५ 'निद्रातन्द्रादय' ङ. । ६ 'मूलतालु' ख. घ. । ७ 'मूर्द्धे' ङ. । ८ 'त्वणे' घ. । ९ 'मिति' ख. । १० 'व्यक्तं' ख. ङ. । ११ 'कायचिकित्सकस्य' घ. ङ. । १२ 'प्रागुक्त' घ. ङ. । १३ 'क्रियाक्रम' ङ. । १४ 'कुशलोऽप्युपलभ्य लिंगं' ख. । 'कुशलो ह्युपलब्धलिंगो' घ. । 'कुशलोऽप्युपलब्धलिंगो' ङ. । १५ 'रोगे भि' ख. घ. ङ. ।

दोषधातुमलमूलमिदं रुग्-
युक्तमुक्तमृषिभिर्नृशरीरम् ।
तद्विकारमुपलभ्य[1] भिषग्भि-
र्भेषजैरुपशमः करणीयः ॥ ४३ ॥

तत्र तावदनिलः शममेति
स्नेहवस्तिपरिषेकनिरूहैः ।
भुक्तमात्रबलदेन नराणा-
मोदनेन मृदुमांसरसेन ॥ ४४ ॥

द्राक्षया त्रिफलया त्रिवृता च[2]
स्रंसनेन रुधिरस्रुतिभिश्च ।
सर्पिषा च पयसा सितया च
स्वादुना भवति पित्तनिवृत्तिः ॥ ४५ ॥

लङ्घनेन वमनेन यवान्न[3]-
प्राशनेन शिरसश्च विरेकैः ।
कट्फलादिकबळैरहिमाभि-
श्चाद्भिरत्र[4] शममेति कफश्च[5] ॥ ४६ ॥

इतीदमुक्तं यदुदीरितं पुरा[6]
समुच्चये सूत्रमविस्तरौषधम् ।
क्रियद्भिरप्यौषध[7]संग्रहैर्गणै-
र्निगद्यते चान्यदतश्चि[8]कित्सितम् ॥ ४७ ॥

रास्नात्रिकण्टकगुहाऽतिगुहाऽश्वगन्धा-
गन्धर्वहस्तकपिकच्छुपुनर्नवाभिः ।
छिन्नाबलाद्विपबलाऽतिबलावरीभि-
रित्यौषधीभिरनिलामयजिद्गणोऽयम् ॥ ४८ ॥

---

१ ‘लक्ष्य’ ख. । २ ‘वा’ ङ. । ३ ‘यथान्न’ ख. । ४ ‘र्वाभिरत्र’ ङ. । ५ ‘वलासः’ ङ. । ६ ‘पुरः’ घ. । ७ ‘रित्यौषध’ ग. । ‘रप्यौषधि’ ङ. । ८ ‘तरचि’ ख. ।

काकोलीद्वयमृद्धिवृद्धिमधुकं मेदाद्वयं पद्मकं
शृङ्गीकीचकरोचनाऽमृतलता[1] द्वे मुद्गमाषच्छदे' ।
जीवन्ती च सजीविका सऋषभा स्यात् पुण्डरीकान्विता
काकोल्यादिरुदीरितोऽयमृषिभिः पित्तापहस्तर्पणः ॥ ४९ ॥

कृष्णाग्रन्थिकचव्यचित्रकवृषा[2]'विश्वौषधाजाजिभिः
पाठारामठरेणुकामधुरसासिद्धार्थतिक्तोषणैः ।
स्पृक्काशक्रयवाजमोदतुटिभिर्भार्ङ्गीविळङ्गान्वितै-
रेभिर्दीप्तिकरः कफामयहरः कृष्णादिरुक्तो गणः ॥ ५० ॥

स्थिरापृथक्पर्णिपुनर्नवाभि-
स्त्रिकण्टकैरण्डजटोच्चटाभिः ।
विदारिकानागबलावरीभि-
रयं गणः पित्तसमीरणघ्नः ॥ ५१ ॥

कट्फलांबुधरधान्यकभार्ङ्गी-
शृङ्गिपर्पटक[3]'विश्ववचाभिः ।
साभयाऽमरसुगन्ध[4]'तृणाभि-
र्वर्ग एष कफवातगदघ्नः ॥ ५२ ॥

त्रायन्तिकाकुटजबीजवृषामृताभि-
स्तिक्तापटोलपिचुमन्ददुरालभाभिः ।
भूनिंबराजतरुपद्मकपर्पटाख्यै-
रेभिर्गणोऽयमिति पित्तकफामयघ्नः ॥ ५३ ॥

विभीतकामलकहरीतकीभिः
फलत्रयं कथितमिदं भिषग्भिः ।
सकुष्ठिनां मुखनयनामयानां
प्रमेहिणां व्रणगळगण्डिनाञ्च ॥ ५४ ॥

---

१ 'लता द्विमुद्गमाषद्वयं' ग. । २ 'विषा' ग. घ. ङ. । ३ 'कर्कटक' घ. । ४ 'सुगन्धि' ग. ।

विश्वोपकुल्यामरिचैरमीभि-
द्रव्यैस्त्रिभिस्त्र्यूषणमुक्तमेतत् ।
भिषग्भिराद्यैर्मतिबोधनाय
ससन्निपातस्य जडस्य जन्तोः ॥ ५५ ॥

सपिप्पलीग्रन्थिकचव्यचित्रकैः
सनागरैः पञ्चभिरेभिरौषधैः ।
इतीरितं तत् खलु पञ्चकोलकं
प्रणष्टवह्नेरतिदीप्तिकारकम् ॥ ५६ ॥

वटीवटोदुंबरवेतसाना-
मश्वत्थवृक्षेण समन्वितानाम् ।
त्वक्पञ्चकं पञ्चमहीरुहाणा-
मिति व्रणघ्नं श्वयथुघ्नमेतत् ॥ ५७ ॥

एलागुल्गुलुदारुकुन्दुरुमुरास्थौणेयकौन्तीनतै-
श्चण्डाचोरकचोच[1]चन्दननखश्रीवेष्टकव्यामकैः ।
स्पृक्काकुंकुमरुक्तुरुष्कफलिनीमांसीलवङ्गागुरु-
त्वक्पत्रोरगकेसरैरिति विषश्लेष्मानिलघ्नो गणः ॥ ५८ ॥

काकोल्यौ द्वे जीवकश्चर्षभश्च[2]
मेदायुग्मं सार्द्धमृद्धिश्च वृद्धया ।
इत्युद्दिष्टैरष्टभिश्चाष्टवर्गः[3]
पित्तव्याधिघ्नो भवेद्[3] बृंहणश्च ॥ ५९ ॥

त्वक्पत्रकैलं त्रिसुगन्धमेतत्
प्रकीर्तितं वातकफापहारि ।
वर्ण्यं विषघ्नञ्च सनागपुष्पं
ज्ञेयं चतुर्जातकमेतदेव ॥ ६० ॥

---

१ 'चोचकचोर' ङ. । २ 'ऋषभः स्यात्' ख. । ३ 'रष्टवर्गः प्रदिष्टः सद्भिः पित्तव्याधिजित्' ख. घ. ।

वरुणकुरण्टक[1]'शिग्रुबृहतीद्वयदर्भ-
वरीककुभकर[2]श्चिरिविल्वरणी'शिखिभिः।
द्विपबलयाऽग्निमन्थयुतया[3] च' समोरटया
भवति गणः सकर्कटभषविषाणिकया ॥ ६१ ॥

गुल्मेषु विद्रधिषु वातवलासजेषु
कोष्ठान्तरस्थितिषु शूलरुगातुरेषु[4]' ।
प्रायः कफानिलविकारनिपीडितानां-
मुक्तो नृणां[5]' वरुणकादिरयं भिषग्भिः ॥ ६२ ॥

[6]श्रीपर्णिनी'ज्वलनमन्थवसन्तदूती-
[7]डुँण्डूक'विल्वमिति तत् पृथुपञ्चमूलम् ।
श्लेष्मानिलामयहरं हितमेतदेव
मेदस्विनामलसकोपहतात्मनां च[8]' ॥ ६३ ॥

व्याघ्री बृहत्यतिगुहा च गुहा[9]' श्वदंष्ट्रा-
संयुक्तमेभिरिति तत् कथितं कनीयः ।
पित्तानिलोल्बणविकारहरो गणो[10]ऽय-
माभ्यां' भवेदिति गणो दशमूल[11]संज्ञः' ॥ ६४ ॥

प्रायस्त्रिदोषशमनं[12]' पवनामयेषु
श्लेष्मोल्बणेषु च गदेषु भिषग्भिरुक्तम्[13]' ।
कासेषु सन्निपातितेषु शिरोरुजायां
श्वासेषु हिक्किषु[14] हितं दशमूलमेतत्' ॥ ६५ ॥

---

१ 'कुरंट' ग. । २ 'करम्भविल्वारणि' घ. । ३ 'तया' ग. । ४ 'रुजाधिकेषु' ङ. । ५ 'गणो' ङ. । ६ 'श्रीपर्णिका' ङ. । ७ 'टिंट्टक' ख. ग. । ८ 'हि' ख. घ. ङ. । ९ 'बृहत्यादिगुहातिगुहा' ङ. । १० 'गणाभ्यां द्वाभ्यां' ख. ग. । 'गणोऽयं द्वाभ्यां' ङ. । ११ 'मूल उक्तः' ङ. । १२ 'शमनः' ङ. । १३ 'रुक्तः' ङ. । १४ 'षु हितो दशमूलसंज्ञः' ङ. ।

[1]अष्टादशभिरमीभिर्द्रव्यगणैर्वीक्ष्य वातपित्तकफान् ।
योगा रोगार्त्तानां विभज्य भिषजा प्रकल्प्यन्ते ॥ ६६ ॥
तैलघृतचूर्णकल्क[2]प्रलेपसेकावगाहपानानि ।
आस्थापनानुवासननस्याञ्जनवर्त्तिविधयश्च ॥ ६७ ॥

प्रावृड्घनात्ययवसन्तदिनेषु यस्मात्
प्रादुर्भवन्ति पवनादिरुजस्ततश्च ।
वातादिरोगविगमाय[3] शरीरशुद्धिः
स्यादम्बुदागमशरन्मधुवासरेषु ॥ ६८ ॥

प्राक्पाचनं स्नेहविधिर्विधेयः[4]
स्वेदस्ततः स्याद्वमनं विरेकः ।
निरूहण[5]स्नेहनवस्तिकर्म
नस्यं क्रमश्चेति भिषग्वराणाम् ॥ ६९ ॥

रास्नापटोलपिचुमन्द[6]दुरालभाभिः
शुण्ठ्याटरूषकफलत्रयवारिभिर्वा ।
पक्वामदोषवपुषस्तदनन्तरं हि
स्नेहो हितः सुरभिवाशककट्फलादिः[7] ॥ ७० ॥

बलादिना वाऽनिलजे विकारे
पैत्ते महातिक्तकसर्पिषा वा ।

---

१. रास्नादिः । २. काकोल्यादिः । ३. कृष्णादिः । ४. त्रायन्त्यादिः । ५. स्थिरादिः । ६. (कट्फलादिः ।) ७. एलादिः । ८. वरणादिः । ९. पृथुपञ्चमूलम् । १०. कनीयपञ्चमूलम् । ११. दशमूलम् । १२. फलत्रयम् । १३. त्र्यूषणम् । १४. पञ्चकोलम् । १५. त्वक्पञ्चकम् । १६. अष्टवर्गम् । १७. त्रिसुगन्धम् । १८. चतुर्जातिम् । इति क्रमो वेद्यः ङ. पुस्तके । २ 'कल्कचूर्ण' ङ. । ३ 'दोषशमनाय' घ. । ४ 'हविधिस्ततश्च' घ. ङ. । ५ 'णान्वासन' ख. घ. ङ. । ६ 'पयोभिरादौ' ग. घ. । ७ तो मधुरवाशकषट्पलादिः' ङ ।

धान्वन्तरेणाथ वलासरोगे
  स्नेहेन मिश्रे[1]ण विमिश्रिते तु' ॥ ७१ ॥
रास्नादिभिः पलचतुष्कमितैर्जलस्य
  द्रोणे [2]श्रृतैश्च'रणशोषकृते कषाये ।
एलादिभिः समधुरैरिति दुग्धपिष्टै-
  स्तैलं विपक्वमनिलापहरं नराणाम् ॥ ७२ ॥
रास्नादिभिः स[3]मधुरैः' ससुगन्धिभिश्च
  [4]कल्की'कृतैरतिबलातुलया कषाये ।
द्रोणेऽम्भसः क्वथितया दशमूलजे [5]च'
  तैलं श्रृतं पवनजित् सपयस्कमेतत् ॥ ७३ ॥
शैलेयचन्दनदलद्रविडीगुलूची-
  रास्नाबलाद्विपबलानलदैः सकुष्ठैः ।
साभीरुदारुतगरागुरुजीवनीयै-
  स्तैलं बलांभसि पचेत् पयसाऽनिलघ्नम् ॥ ७४ ॥
सैरेयकामृतलतासरणी[6]कषायैः'
  शैलेयकादिभिरिति प्रथमोक्तकल्कैः ।
युक्पञ्चमूलयवकोलकुलत्थ[7]तोयै-
  स्तैलानि चा'निलहराणि पचेत् सदुग्धैः ॥ ७५ ॥
वाशापटोलपिचुमन्दकिराततिक्त-
  त्रायन्तिकामृतलताकुटजप्रसूनैः ।
तिक्तायवाषकफलत्रयपर्पटै[8]श्च'
  पक्वं घृतं जयति पित्तरुजः समस्ताः ॥ ७६ ॥
शुण्ठीकणाग्रन्थिकचव्यचित्रकैः
  ससैन्धवैर्वा सयवाग्रजैरथ ।

---

१ 'ण तु मिश्रितेषु' ख. । 'ण विमिश्रितेषु' घ. । २ 'श्रृते चं' घ. ङ. । ३ 'मधुकैः' घ. । ४ 'कल्कैः' ख. । ५ 'तु' ख. । ६ 'कषाये' ङ. । ७ 'त्थतोये तैलानि वा' ङ. । ८ 'स्तु' ङ. ।

सदुग्धमेभिः पलभागिकैः[1] शृतं
घृतं कफव्याधिहरं हि षट्पलम् ॥ ७७ ॥

शुण्ठ्यादिभिः सलवणत्रययावशूकैः
सस्वर्जिका[2]ख्यचिरिबिल्वज[3]वल्ककल्कैः ।
षड्भिः[4] पलैरिति घृतं शृतमग्निहेतुः
स्यादार्द्रकद्रवयुतं पृथुषट्पलाख्यम् ॥ ७८ ॥

पुनर्नवैरण्डयवातसीभिः
कार्पासजैरास्थिभिरारनाळैः ।
स्विन्नैरमीभिस्त्विति[5] षड्भिरेव
स्वेदः समीरार्त्तिहरो नराणाम् ॥ ७९ ॥

सकलिंगवचामगधामधुकं
लवणेन घृतं[6] मदनांबु[7] पिबेत् ।
वमनं कफरोगहरं हि नृणा-
मथवा पिचुमन्दकषायकृतम्[8] ॥ ८० ॥

उरुबूकतैलमथ बिन्दुघृतं
त्रिफलाकषायमथ गुल्गुलुकम्[9] ।
सुविरेचनं विरचितं हि नृणा-
मिति वातपित्तकफरोगवताम् ॥ ८१ ॥

गुडतिन्त्रिणीककुडवस्तु भवे-
दपि चौत्र[10] मूत्रकुडवर्द्धितयम् ।
मिसिराठरामठकसिन्धुयुतं
सुनिरूहणं[11] हि[12] विहितं मुनिभिः ॥ ८२ ॥

---

१ 'भागिभिः' ख. । २ 'काम्रि' घ. । 'काब्द' ङ. । ३ 'यवाष' घ. । ४ 'एभिः' ङ. । ५ 'स्विन्नैः समांशैरिति' ङ. । ६ 'युतं' ख. घ. ङ. । ७ 'वमनेऽम्बु' ङ. । ८ 'युतं' ङ. । ९ 'गुल्गुलुना' ख. । १० 'चाज' ख. । ११ 'नृनिरूहणं' ख. घ. । १२ 'विनिहितं' ग. ।

मगधामधुकामय[1]विल्व'वचा-
भिसिपुष्करमूलशठीशिखिभिः ।
मदनामरदारुयुतैर्विपचेत्
पयसा गुदवस्तिषु तैलमिदम् ॥ ८३ ॥

[2]गुदजानुगुल्फत्रिकगुह्य'कटी-
जठरान्तरेषु पवनस्य [3]रुजं' ।
विनिहन्ति गुल्ममतिसारगदान्
ग्रहणीविकारमनुवासनतः ॥ ८४ ॥

शिग्रुबीजसुरसा[4]र्जक'बीजै-
र्विश्वजीरककणामरिचैश्च ।
नस्यमूर्ध्वरुजि योज्यममीभिः
कारवीरुचकतुम्बुरुभिश्च ॥ ८५ ॥

[5]इतीयमुक्ता' पवनादिरोगिणां
किं[6]चित् क्रियाऽन्या तदपि प्रचक्ष्यते' ।
प्रतिज्वरादिप्रविभक्तभेषजै-
रतश्चिकित्साकलिका भिषङ्[7]मता' ॥ ८६ ॥

आदौ ज्वरे ज्वर[8]वतां' कफजे विशेषा-
दामातिसारिणि च[9]' शोणितपित्तरोगे ।
छर्द्यां शिरोरुजि वलाससमुद्भवाया-
मक्ष्यामयेषु कफजेषु विषूचिकायाम् ॥ ८७ ॥

विस्फोटकामयिनि वक्त्रविकारवत्सु
सद्यःप्रसूतवनितासु च शोफवत्सु ।

---

१ 'यविश्व' ग. । २ 'गुदजानि गुल्फगुदगुह्य' ग. । ३ 'रुजः' ख. घ. ङ. । ४ 'साब्जक' ङ. । ५ इतीदमुक्तं ङ. । ६ 'क्रिया क्रियाऽन्या तदपि प्रचक्षते' घ. । 'कर्म क्रिया चान्यदपि प्रवक्ष्यते' ङ. । ७ 'मिता' ङ. । ८ 'वतः' ख. ङ. । ९ 'स' ङ. ।

[1]सद्यःस्नुतेषु' नृषु लङ्घनमुद्दिशन्ति
वैद्या यथाबलमजीर्णविकारिणां [2]च' ॥ ८८ ॥

विण्मूत्रवातसरणे तनुलाघवे च
तन्द्राक्लमे [3]च विरते' वपुषः पटुत्वे ।
[4]उद्गार'वक्त्रविवरोदरहृद्विशुद्धौ
स्वेदोद्गमे [5]सति भवत्य'शनाभिलाषे ॥ ८९ ॥

इत्येतदातुर[6]सुल'ङ्घितलिंगमङ्गे
सम्यग्भिषग्भिरवधार्य विचार्य बुद्ध्या ।
तद्दोषदेशबलकालविकार[7]सात्म्या-
न्युद्दिश्यते' तदनु पथ्यमथौषधं [8]च' ॥ ९० ॥

पथ्यैः पुराणसितषष्टिकरक्तशालि-
[9]मृद्वोदनैः सघृतमुद्गमसूरसूपैः' ।
गोधूममण्डकयुतैर्यवसक्तुभिश्च
[10]सांजाजिसैन्धव'घृतैरथ तक्रयुक्तैः ॥ ९१ ॥

लावैणतित्तिरिकपिञ्जलकेकिकूर्म-
गोधा[11]शश'क्रकरमांसरसैः समांशैः ।
[12]सुस्वादु'डाडिम[13]रसैरमितप्रदोहै'-
[14]'दुग्धैर्घृतैरपि' च शर्करया समेतैः ॥ ९२ ॥

---

१ 'सद्यः क्षतेषु' ख. घ. । 'सर्वक्षतेषु' ङ. । २ 'हि' घ. ३ 'च विगते' ङ. । ४ 'सोद्गार' ङ. । ५ 'भवति सत्य' घ. । ६ 'विल' ङ. । ७ 'सात्म्यमुद्दिश्यते' ङ । ८ 'वा' ख. । ९ 'शुद्धोदनैर्मधुर-डाडिमयूषयुक्तैः' ख. । १० 'भोज्यैस्सुसैन्धव' ख. । ११ 'शिरः' ग. । १२ 'सस्वादु' ख. । १३ 'रसैः पिशितप्रदेहैः' ग. घ. । 'रसैः पिशितप्रलेपैः' ङ. । १४ 'द्रव्यैः शृतैरपि' ङ. । 'दुग्धैः शृतैरपि' ख. घ. ।

शाकैः कलायलघुमूलकतण्डुलीय-
चिल्लीपटोल[1]दल'वास्तुक[2]कर्कास'मर्दैः ।
[3]वार्ताक'पुष्पफलशाक[4]कृतैः' प्रकारै-
रेभिः कृतैरपि नृणां न भवन्ति रोगाः ॥ ९३ ॥

यद्यस्य यौगिकमिति प्रविकल्प्य पथ्यं
तस्मै तदेव भिषजाऽमयिने प्रदेयम् ।
इत्यातुरस्य निरुजोऽथ [5]नरस्य' नित्य-
मन्नान्यथौषधमुपाचरतो न रोगाः ॥ ९४ ॥

ज्वरातिसारग्रहणीविकारिणां
[6]तथा'ऽर्शसां चापि भगन्दरा[7]वर्तताम्' ।
सशोफरोगोदरगुल्मरोगिणां
सविद्रधीनां गल[8]गण्डरोगिणाम्' ॥ ९५ ॥

विस्फोटकश्लीपदवातरक्तिनां
विसर्पकु[9]ष्ठामयिनां किलासिनाम्' ।
प्रमेहिणां पाण्डुविकारिणां नृणां
सश्वास[10]कासारुचि'रक्तपित्तिनाम् ॥ ९६ ॥

सतृड्वमीहिक्किषु शूलरोगिषु
प्रोक्तं ह्युदावर्तिषु मूत्रकृच्छ्रिषु ।

---

१ 'फल' घ. ङ. । २ 'चक्र' ख. । ३ 'वृन्ताक' ग. । ४ 'भवैः' घ. ङ. । ५ 'जनस्य' ख. घ. ङ. । ६ 'ततो' ख. । ७ 'र्तिनां' ङ. । ८ 'गण्डमालिनां' ग. घ. ङ. । ९ 'मयशुभ्रकुष्ठिनां' ग. । १० 'कासा-मय' ग. घ. ।

सराजयक्ष्मक्रिमि[1]वातरोगिणां'
चिकित्सितं कायचिकित्सिते मया ॥ ९७ ॥

शालाक्यशल्यामयभूतविद्या
कौमारतन्त्रं विषतन्त्रयुक्तम् ।
रसायनं तन्त्रमनन्तरं च[2]'
वाजीकरं तन्त्रम[3]थ' प्रदिष्टम् ॥ ९८ ॥

अथ ज्वरचिकित्सा ॥

सालस्यमस्वेदमरोचकार्त-
मुन्निद्रमानद्धमलिद्धवह्निम् ।
सांगव्यथं [4]साममिति' ज्वरार्त-
मभोजनैरुष्णजलैश्चिकित्सेत् ॥ ९९ ॥

तृट्[5]छर्दिदाह'मुखशोषसमन्वितः स्या-
देभिः [6]षडङ्ग'गणसङ्गसुगन्धिभिस्तम् ।
लामज्जपर्पटकपद्मकचन्दना[7]ब्दै-'
ह्रीबेरवारिभिरनुष्ण[8]जलै'श्चिकित्सेत् ॥ १०० ॥

बलाव[9]बोधेन कृतापतर्पण-
[10]स्ततो दिन'स्यापगमे बुभुक्षितः ।
गतामदोषः पवनादिजज्वरी
विधिं वि[11]दध्यादिति' पथ्यभेषजम् ॥ १०१ ॥

---

१ 'वातरोगिषु' ङ. । २ 'वा' ख. । ३ 'मिति' ग. घ. ङ. । ४ 'साममति' ग. घ. । ५ 'दाहछर्दि' ख. । ६ 'विल्लङ्ग'(?) ङ. । ७ 'ब्ज' ग. । ८ 'तमै' ख. । ९ 'रोधेन' ख. ङ. । १० 'स्तदोदन' घ. । 'स्तथा दिन' ङ. । ११ 'दध्यादति' ग. । 'दध्यादथ' ङ. ।

सजीरकुस्तुम्बुरुकण्टकारिका-
त्रिकण्टकैः षष्टिकतण्डुलैः कृताम् ।
पिबेद्यवागूमथवा दुरालभा-
निदिग्धिकांभःशृतशालितण्डुलाम् ॥ १०२ ॥

सशीतनिद्रारुचिगौरवाधिकं
कफज्वरं मुद्गदलोदकौदनैः ।
सतृड्वमीदाहमनल्पपित्तजं
जयेत् सितामाक्षिकलाजसक्तुभिः ॥ १०३ ॥

सलावसारङ्गमयूरतित्तिरि-
प्रकल्पितैर्मांसरसैः सडाडिमैः ।
सरुक्प्रकम्पं[1] पवनप्रकोपजं
प्रणाशयेत् प्राणभृतामिति[2] ज्वरम् ॥ १०४ ॥

ततश्च विश्वाब्ददुरालभामृता-
किरातदुस्पर्शपयोदपर्पटाः ।
वृषाब्दविश्वौषधधन्वयाषकाः
समीरणादिज्वरनाशनाः[3] स्मृताः ॥ १०५ ॥

विश्वामृतावाशककण्टकारिका-
पलं पलैः षोडशभिर्जलस्य च ।
क्काथीकृतं तच्चरणावशेषितं
सपिप्पलीचूर्णमिदं ज्वरापहम् ॥ १०६ ॥

[4]कृष्णाग्निपथ्यामलकैः कषायः
कृतः[5] समस्तज्वरहाऽग्निहेतुः ।

---

१ 'सकम्पं' ख. । २ 'तामति' ग. । 'तामिह' ङ. । ३ 'नाशकाः' घ. । ४ श्लोकोऽयं तिक्तेत्यादिपद्यानन्तरं दृश्यते ग. घ. पुस्तकयोः । ५ 'मल्कीकषायः पीतः' ङ. ।

व्याघ्रीगुलूचीवृषजोऽथ कास-
श्वासज्वरघ्नश्च सपिप्पलीकः ॥ १०७ ॥

तिक्ताभयाग्रन्थिकराजवृक्षैः
सवारिदैरुत्क्वथितः कषायः ।
पीतः सशूलाममरुद्बलास-
ज्वरापहः पाचनदीपनश्च ॥ १०८ ॥

दुरालभावालकतिक्तरोहिणी-
पयोदकुष्ठौषधसंभृतं[1] जलम् ।
प्रपीतमुष्णं सकलज्वरापहं
प्रवर्द्धनं जाठरजातवेदसः ॥ १०९ ॥

सकुण्डलीपद्मकरक्तचन्दनं
सनिंबकुस्तुम्बुरु वारि यच्छृतम् ।
पिबेत् स[2] ना पित्त'वलासजं ज्वरं
जयेत् सतृट्[3]ताप'मरोचकान्वितम्[4] ॥ ११० ॥

निंबा[5]'ब्ददारुकटुकात्रिफलाहरिद्रा-
क्षुद्रापटोलदलनिष्क्वथितः कषायः ।
पेयस्त्रिदोषजनितज्वरनाशनाय
क्वाथः समं मगधया दशमूलजो वा ॥ १११ ॥

पटोलयष्टीमधुतिक्तरोहिणी-
घनाभयाभिर्विषमज्वरापहः ।
कृतः कषायस्त्रिफलामृतावृषैः
पृथक् पृथग्वा विषमज्वरापहः ॥ ११२ ॥

---

१ 'विश्वौषधकल्पितं' ख. ग. घ. । २ 'सपित्तश्च' ख. । 'सदा पित्त' घ. ङ. । ३ 'दाह' ङ. । ४ अस्याग्रे 'हरिद्रा भद्रमुस्ता च त्रिफला कटुरोहणी । पिचुमन्दपटोली च देवदारु निदिग्धिका ॥ एषां कषायः पीतस्तु सन्निपातज्वरं जयेत् ॥' इति घ. पुस्तकेऽधिकः पाठः । ५ 'विश्वा' ङ. ।

[1]सनागरोशीरघनैस्सधान्यैः
सपिप्पलीकैश्च सचन्दनैश्च' ।
तृतीयकं हन्ति कृतः कषायः
समाक्षिकश्चापि सशर्करश्च [2]॥ ११३ ॥

पथ्यास्थिरानागरदेवदारु-
धात्रीवृषैरुत्क्वथितः कषायः ।
सितोपलामाक्षिकसम्प्रयुक्त-
[3]श्चातुर्थिकं' हन्त्यचिरेण पीतः ॥ ११४ ॥

त्रि[4]भिरथ परि'वृद्धं [5]पञ्चभिः सप्तभिर्वा
दशभिरथ विवृद्धं पिप्पलीवर्द्धमानम्' ।
इति पिबति [6]पयो' यस्तस्य न श्वासकास-
ज्वरजठरग[7]दा'[8]र्शोवातरक्तक्षयाः स्युः ॥ ११५ ॥

इत्यौषधानुचरणेन [8]हृते' वलासे
जीर्णे ज्वरे [9]मरुति' किञ्चिदुपप्लुते [10]च' ।
वातादिजिद्गणपयःश्रृत[11]मुक्तमाज्यं'
स्यात् षट्पलं पृथु भवेदथ षट्[12]पलं वा' ॥ ११६ ॥

विश्वाग्निचव्यमगधामगधाजटाभि-
राभिः पलप्रमितिभिः सयवाग्रजाभिः ।
सर्पिः श्रृतं पयसि षट्पलमेतदर्शः-
प्लीहोदरज्वरिषु गुल्मिषु पथ्यमुक्तम् ॥ ११७ ॥

---

१ 'सनागरोशीरघनस्सधान्यः सकुण्डलीकश्च (सपिप्पलीकश्च. घ. ङ.) सचन्दनश्च' ग. घ. ङ. । २ अस्याग्रे 'तिक्तोशीरबलाधान्यपर्पटापोधरैः कृतः क्राथः पुनस्समायातं ज्वरं शीघ्रं विनाशयेत् ॥' इति ङ. पुस्तकेऽधिकः पाठः । ३ 'श्चतुर्थकं' ख. । ४ 'तिसृभिरथ वि' घ. ङ. । ५ पिप्पलीवर्द्धमानं दशभिरथ विवृद्धं पञ्चभिः सप्तभिर्वा' ग. । ६ 'पुमान्' ख. । ७ 'गुदा' ख. । ८ 'हते' ङ. । ९ 'महति' घ. । 'सरति' ङ । १० 'वा' ख. ङ. । ११ 'दुग्द्धमाज्यं' ङ. । 'मुक्तमाद्यं' ख. घ. । १२ 'पलाख्यं' ङ. ।

[1]पूतीकोषणपञ्चकोलरुचकैः साजाजिकैः साम्बुदैः
सक्षारातिविषैः सहिंगुहपुषासिन्धूद्भवैः कल्कितैः’ ।
शुक्तेनार्द्रकसम्भवेन च रसेनैतन्महाषट्पलं
सर्पिः पक्वमरोचकाग्निसदनप्लीहज्वरश्वासजित् ॥ ११८ ॥

कृष्णातामलकीघनप्रतिविषासिंहीस्थिराशारिबा-
विश्वोशीरकलिंगबिल्वकटुकात्रायन्तिकाचन्दनैः ।
सद्राक्षामलकाग्निभिः पिचुमितैः प्रस्थं पचेत् सर्पिषः
कासश्वासहलीमकारुचिवमीगुल्मज्वरघ्नं नृणाम् ॥ ११९ ॥

मूर्वाब्ददारुकटुकामधुकाश्वगन्धा-
रास्नाहरेणुमिसिचन्दनरुङ्निशाभिः ।
लाक्षारसेन च समेन समस्तु सिद्धं
तैलं [2]ज्वरापहरमेत[3]द्दितिप्रसिद्धम्’ ॥ १२० ॥

सस्वर्जिकालोहित[4]यष्टिकारुक्’
सविश्वलाक्षाक्षणदा समूर्वा ।
सषड्गुणो[5]दश्विदिति प्रपक्वं’
षट्कट्वरं तै[6]लमिदं ज्वरघ्नम्’[7] ॥ १२१ ॥

इति ज्वरचिकित्सा ॥

---

१ ‘पूतीकाग्निकपञ्चकोलरुचकैः साजाजियुग्मोद्भिदैः सक्षारैः सविडैः सहिंगुहपुषासिन्धूद्भवैः कल्कितैः’ ख. ग. घ. । ‘पूतीकाग्निकपञ्चकोलरुचकैः साजाजियुग्मोद्भिदैः सक्षारैः सविळंगहिंगुहपुषासिन्धूत्थपथ्यामयैः’ ङ. । २ ‘ज्वरग्रहकृशत्वहरं बलेष्टं’ ङ. । ३ ‘दिति प्रदिष्टं’ ख. घ. । ४ ‘यष्टिकासरुक्’ ख. ग. । ‘चन्दनारुक्’ घ. । ५ ‘दश्विति साधु पक्वं’ ङ. । ६ ‘लमिदं ज्वरापहं’ ख. ग. । ‘लमिति ज्वरघ्नं’ घ. ङ. । ७ अस्याग्रे ‘तिक्तातिक्तकपर्पटामृत-शटीरास्नाकणापौष्करत्रायन्तीबृहतीमहौषधशिवादुस्पर्शभार्ङ्गीकृतः । क्वाथो हन्ति महात्रिदोषमहहास्वप्नं (?) दिवाजागरं रक्तं हृन्मुखशोषदाहकसनश्वासानशेषानपि ॥ लोहितचन्दनपद्मकधान्यच्छिन्नरुहापिचुमन्दकषायः । पित्तकफज्वरदाहपिपासा-वान्तिहृद्रोगविनाशहरः स्यात् ॥ इति ङ. पुस्तकेऽधिकः पाठः ।

अथातिसारचिकित्सा ॥

सासृक्सगुह्यगुदवंक्षणवस्तिशूल-
मामातिसारमनिलप्र[1]वि'बद्धविट्कम् ।
दोषानुरू[2]पविदितैरति'लङ्घनाद्यैः
पेयादिभिस्तमवलो[3]क्य भिषक् चिकित्सेत्' ॥ १२२॥

प्राक् पञ्चकोल[4]कजलप्लुत'तण्डुलाभिः
पेयाभिरप्यथ पृथग्लघुलाजमण्डैः ।
मृद्वोदनैर्मधुरडाडिमयूषयुक्तै-
रामातिसारशमनैरुपदिष्ट[5]मन्थैः' ॥ १२३ ॥

विश्वाभयाघनवचातिविषाम[6]राह्व'-
क्वाथोऽथ विश्वजलदातिविषाशृतो वा ।
आमातिसारशमनः [7]कथितः' कषायः
शुण्ठीघनप्रतिविषामृतवल्लिजो वा ॥ १२४ ॥

ततः कलिंगातिवि[8]षाग्नि'विल्वैः
सवालकैरुत्क्वथितः कषायः ।
तस्मै सशूलाय सशोणिताय
सामाय शस्तोऽथ कलिंगषट्कः ॥ १२५ ॥

सहरीतकीप्रतिविषारुचकं
सवचं सहिंगु सकलिङ्गयवम् ।
इति तत् कलिङ्गयवषट्कमिदं
रुधिरातिसारगुदशूलहरम् ॥ १२६ ॥

---

१ 'प्रति' ख. । २ 'पविहितैरति' ख. । 'पविहितैरिति' घ. ङ. ।
३ 'क्य ततश्चिकित्सेत्' । ४ 'जलसम्प्लुत' घ. । ५ 'पथ्यैः' ग. घ. ङ. ।
६ 'सुराह्व' घ. ङ. । ७ 'क्वथितः' घ. । ८ 'षाब्द' ख. घ. ।

स्विन्नाम[1]विल्व'यवगोक्षुरकोरुबू[2]कै-
श्छिन्नोद्भवा'तुषजलैर्मधुनाऽवलीढा ।
बद्धाल्पविट्कमतिशूलमसृग्विमिश्र-
मामातिसारमपहन्ति [3]हरीतकी वा' ॥ १२७ ॥

सनागरैः सातिविषापयोधरैः
सकुण्डलीकैः सकिराततिक्तकैः
कलिं[4]गकै'रुत्क्वथितं निषेवितं
सरुग्ज्वरं हन्त्यतिसारमामजम् ॥ १२८ ॥

अथ पक्वातिसारचिकित्सा ॥

मुस्तमोचरसलोध्रधातकी-
पुष्पविल्वगिरिकोटजैः फलैः ।
चूर्णितैः सगुलतक्रसेवितै-
र्निम्नगाजलरयोऽपि रुध्यते [5]॥ १२९ ॥

क्वाथश्च[6]' मुस्तककृतः समधुः सुशीतः
पीतः [7]प्रपक्व'मतिसारगदं निहन्ति ।
पक्वातिसारमथ कौटज[8]वल्क'लेहः
सांबष्ठकादि[9]मधुमागधिकायुतो' वा ॥ १३० ॥

श्रीपर्णिपर्णावृतदीर्घवृन्तज-
त्वक्कृपिण्डकात्तण्डुलवारिकल्कितात् ।

---

१ 'सविल्व' ख. । 'ब्दविल्व' घ. ङ. । २ 'बूकच्छिन्नोद्भवा' ख. घ. । बूकच्छिन्नोद्भवैः' ङ. । ३ 'हरीतकीयं' घ. ४ 'गजै' ख. घ. । ५ अस्याग्रे 'अजमोदा मोचरसं शृङ्गवेरञ्च धातकीकुसुमम्। गोमथितसम्प्रयु (क्तं) गङ्गामपि वाहिनीं रुन्ध्यात्' ॥ इति घ. पुस्तकेऽधिकः पाठः । ६ 'स्स' ख. ङ. । ७ 'प्रवृत्त' ख. । 'प्रवृद्ध' घ. ङ. । ८ 'शल्क' ख. । 'कल्क' ङ. । ९ 'मगधादिमधूक्षितो' ख. । 'मगधादिमधुप्लुतो' घ. ।

मृद्वेष्टितादग्निविपाचितादसं
पिबेदतीसारहरं समाक्षिकम् ॥ १३१ ॥

इत्युक्तया कल्पनया वटादिना
कल्कीकृतेनोदरगेन तित्तिरेः ।
प्रकल्पितः स्यात् पुटपाकजो रसः
सशर्करः क्षौद्रयुतोऽतिसारजित् ॥ १३२ ॥

इत्यतिसारचिकित्सा ॥

अथ ग्रहणीचिकित्सा ॥

विश्वादिभिः सरुजि पाचनमत्र शस्तं
मुस्तादिभिर्भवति संग्रहणं ततश्च ।
स्याद्दीपनं तदनु च ग्रहणीविकारे
कल्याणकादिभिरिति ग्रहणी[1]चिकित्सा ॥ १३३ ॥

भूनिंबकौटजकटुत्रिकमुस्ततिक्ताः
कर्षांशिकाः सशिखिमूलपिचुद्वयाः स्युः ।
त्वक्कौटजीपलचतुष्कमितागुलाम्भः
पीतं नृणामिह हरेद्ग्रहणीविकारान् ॥ १३४ ॥

सग्रन्थिकं त्रिकटुकं लवणत्रयञ्च
क्षारद्वयं सचविकञ्च सचित्रकञ्च ।
साजाजिमोदमिसिहिंगु विधाय चूर्णं
तद्बीजपूरकरसप्लुतमेतदेव[2] ॥ १३५ ॥

तक्रेण कोष्णसलिलेन तुषांबुना वा[3]
पीतं कुलत्थयवकोलजलेन वाऽपि ।

---

१ 'प्रथिता' ङ. । २ 'तदेषां' ख. घ. ङ. । ३ 'च' ख. घ. ।

मन्दानलेषु नृषु दीप्तिकरं ग्रहण्या-
मर्शस्सु गुल्मिषु च भेषजमेतदेव ॥ १३६ ॥

शुण्ठीत्रिकण्टमगधागजपिप्पलीभिः
पाठाग्निविल्वगिरिधान्ययवानिकाभिः ।
सग्रन्थिकाभिरिति दध्नि घृतं विपक्वं
चाङ्गेरिकारससमं ग्रहणीघ्नमेतत्[1] ॥ १३७ ॥

पाठाधान्ययवान्यजाजिहपुषाचव्याग्निसिन्धूद्भवैः
सश्रेयस्यजमोदकीटरिपुभिः कृष्णाजटासंयुतैः ।
सव्योषैः सफलत्रिकैश्च सतुटि[2]त्वक्पत्रकैरौषधै-
रित्यक्षप्रमितै[3]र्द्विःतैलकुडवैः सार्धत्रिवृन्मुष्टिभिः ॥ १३८ ॥

एतैरामलकीरसस्य तुलया सार्द्धं तुलार्द्धं गुडात्
पक्तव्यं भिषजाऽवलेहवदयं प्राग्भोजनाद्भक्षितः ।
ये केचिद्ग्रहणीगदाः सगुदजाः कासाः सशोषामयाः
सश्वासश्वयथुर्ज्वरो[4]दररुजः कल्याणकस्तान् जयेत् ॥ १३९ ॥

द्रोणाम्भसा सह सहस्रमरुष्कराणा-
मुत्क्वाथ्य तत्र च जले[5] चरणप्रमाणे[6] ।
दत्वा गुलस्य तु[7] तुलां विपचेदमूनि
द्रव्याणि च द्विपलिकानि विचूर्णितानि ॥ १४० ॥

दन्तीत्रिवृत्करिकणाचविकाजमोदा-
पाठाग्निपिप्पलिजटात्रिकटूनि लेहे ।
शीते पलप्रमितमत्र निधाय चूर्ण-
मेलावराङ्गदलकुञ्जरकेसराणाम् ॥ १४१ ॥

---

१ 'गदघ्नं' ङ. । २ 'स्सतुटिभिः' ग. घ. ङ. । ३ 'प्रमितै-स्सतैल' ख. घ. ङ. । ४ 'स्वरो' ख. ग. ङ. । ५ 'मत्र च जले' ख. । 'तत्र सलिले' घ. । ६ 'चरणावशेषे' ङ. । ७ 'च' ख. घ. ।

गुल्माग्निमान्द्यगुदजग्रहणीविकार-
पाण्ड्वामयश्वयथुरुग्विषमज्वराणाम् ।
शस्तः कफोदरकिलासभगन्दराणा-
मघा[1]मरु'ष्करगुडः क्रिमिरोगिणाञ्च ॥ १४२ ॥

इति ग्रहणीचिकित्सा ॥

अथार्शश्चिकित्सा ॥

अर्शांसि सन्ति पवनादसितानि पित्ता-
द्र[2]क्ताच्च' विद्रुमनिभानि कफात् सितानि ।
सर्वोद्भवानि सहजानि च[3]' दुस्सहानि
घ्राणाक्षिकर्णमुखगुह्यगुदेषु च स्युः ॥ १४३ ॥

आध्मानसक्थिसदनानलमान्द्यगुल्म-
प्लीहोदरश्वयथुपाण्डुगदग्रहण्यः ।
सश्वासकासगळदाहमुखप्रसेकाः
सामान्यमेतदिति लक्षणमर्शसां स्यात् ॥ १४४ ॥

तत्रार्शसामुपदिशन्ति चतुष्प्रकार-
मारोग्यमेकमगदैरपरं च शस्त्रैः ।
क्षारेण चान्यदनलेन चतर्थमित्थ-
मित्यागमैकक[4]ुशलाः' किल सुश्रुताद्याः ॥ १४५ ॥

स्यादौषधैरचिरजेषु चि[5]रोद्गतेषु'
क्षारेण च क्षतजपित्तसमुद्भवेषु ।
स्थूलेषु वातकफजेष्व[6]नलेन' शस्त्रैः
सत्वाधिकस्य बलिनश्च[7] सतश्चिकित्सा' ॥ १४६ ॥

---

१ 'न्त्वरु' घ. । २ 'द्रक्तानि' ग. ङ. । ३ 'सु' ख. ।
४ 'कृतिनः' ख. घ. ङ. । ५ 'चिरोत्थितेषु' ख. । 'चिरोद्भवेषु' ङ. ।
६ 'षु हुताश' ङ. । ७ 'स्सततं चिकित्सा' ख. । 'सततं चिकित्स्येत्' ङ. ।

सद्भेषजैरचिरजात[1]गुदामयघ्नैः'
शाम्यन्ति तक्रयवसक्तुगुडाभयाद्यैः ।
काङ्कायनोक्तवटकैरथ सूरणाद्यैः
प्राक्प्राणदैरिति मतं हि भिषग्वराणाम् ॥ १४७ ॥

तक्रेण वा मगधजादिभिरन्वितेन
चूर्णीकृतैः कफकृता न गुदामयाः स्युः ।
भल्लातकैरथ तिलैरसितैः प्रयुक्तैः
प्राग्भोजनादिति न सन्ति कृतैरुपायैः ॥ १४८ ॥

पथ्यादलस्य गुरुणः पलपञ्चकं स्या-
[2]देकं पलं च' मरिचमदपि जीरकाच्च ।
कृष्णातदुद्भवजटाचविकाग्नि[3]शुण्ठी'-
कृष्णादिपञ्चकमिदं पलतः प्रवृद्धम् ॥ १४९ ॥

एतैररुष्करपलाष्टकसंयुतैः स्यात्
कन्दस्त्वरुष्करपलाद्द्विगुणः प्रकल्प्यः ॥
स्याद्यावशूककुडवार्द्धमतः समस्ता-
द्योज्यो गुडो द्विगुणितो वटकीकृतश्च ॥ १५० ॥

[4]काङ्का'यनेन मुनिना वटकः किलाय-
मुक्तः प्रजाहिततमेन गुदामयघ्नः ।
क्षाराग्निशस्त्रपतनैरपि ये न सिद्धाः
सिद्ध्यन्त्यनेन वटकेन गुदामयास्ते ॥ १५१ ॥

[5]अरलुज्वलनाह्वयसेन्द्रयवान्
चिरिविल्वसुसैन्धवविश्वयुतान् ।

---

१ 'गुदोत्थरोगाः' ङ. । २ 'देकं पलं तु' ख. घ. । ३ 'शुण्ठ्याः' ख. घ. । ४ 'कङ्का' ङ. । ५ 'अरलुत्वचवह्निसुरेन्द्रयवं चिरिविल्वससैन्धवशुण्ठियुतम् । मथितेन पिबेद्यदि सप्तदिनमरिशांसि पतन्ति समूलजटम् ॥' ख. । श्लोकोऽयं ग. घ. पुस्तकयोर्नोपलभ्यते ।

मथितेन पिबेदिति सप्तदिनं
गुदजानि पतन्त्यचिरेण गुदात् ॥ १५२ ॥

भागाः षोडश वृद्ध[1]दारुसहितात्' कन्दात् [2]कृतात्' कर्कशा-
दष्टौ चित्रकमूलतश्च [3]तुलिताः' स्युस्तालमूलीयुतात् ॥
तालीसत्रिफलाविडङ्गमगधाविश्वोपकुल्या[4]जटा'-
भल्लातैश्च चतुष्पलैर्द्विपलिकैरेलावराङ्गोषणैः ॥ १५३ ॥

इत्येभिः सकलैर्गुडद्विगुणितैः कुर्याद्भिषङ्मोदकान्
यैर्भुक्तैर्न नृणां भवन्ति गुदजाऽमप्लीहपाण्ड्वामयाः ।
नो गुल्मग्रहणीगदोदररुजः [5]कोष्ठेषु' शूलानि च
श्वासश्लीपदशोफविद्रधियकृद्ग्रन्थ्यर्बुदादीनि च ॥१५४ ॥

तालीसज्वलनोषणाः सचविकास्तुल्या द्विभागा भवेत्
कृष्णामूलसमन्विता त्रिपलिका शूण्ठी चतुर्ज्जातकम् ।
स्यान्मुष्टिप्रमितं गुडद्विगु[6]णितैरेभिः कृता मोदकाः'
कासश्वासगदाग्निमान्द्यगुदजप्लीहप्रमेहा[7]पहाः' ॥ १५५ ॥

इत्यर्शश्चिकित्सा ॥

अथ भगन्दरचिकित्सा ॥

वातेन पित्तेन कफेन सर्वैः
क्षतेन च [8]स्याद्गुदसन्निकृष्टा ।
भगन्दराख्या पिटका प्रपक्वा
बहुव्रणा कष्टतमा प्रदिष्टा' ॥ १५६ ॥

---

१ 'दारुकयुतात्' ङ. । २ 'कृताः' घ. । ३ 'तुलितात्' ख. ङ । ४ 'जया' ग. । ५ 'कोष्ठोत्थ' ङ । कोष्ठे न' ख. । ६ 'गुणितं कुर्यात् भिषङ्मोदकान्' ङ. । ७ 'पहान्' ङ. । ८ 'स्युर्गुदसन्निकृष्टाः भगन्दराख्याः पिटकाः प्रपक्वा (विपक्वा ङ.) बहुव्रणाः कष्टतमाः प्रदिष्टाः' घ. ङ. ।

तस्याः[1] प्रकाराश्शतपोनकोष्ट्र-
ग्रीवापरिस्नाविकृताः क्रमेण ।
शम्बूकिकोन्मार्गगता भिषग्भि-
स्तथा चिकित्स्या न यथैति पाकम् ॥ १५७ ॥
हिता जलौकाभिरसृग्विशुद्धिः
प्राक् पाकतः स्यादचिरोद्गतायाः ।
पक्वाश्च सम्यग्व्रणवच्चिकित्से-
च्चिकित्सकस्तामतिकृच्छ्रसाध्याम् ॥ १५८ ॥
शुक्राशयं यदि गता न गतिर्गुदं वा[2]
स्यात् सेवनीमथ भवेत् प्रचुरव्रणा वा ।
शस्त्रैर्विदार्य विधिवद्व्रणवद्भिषग्भिः[3]
क्षारेण वा ज्वलनतप्तशलाकया वा[4] ॥ १५९ ॥
इति भगन्दरचिकित्सा ॥

अथ शोफचिकित्सा ॥

गुडार्द्रकं वा[5] सुरदारु विश्वं
सनागरं वाऽथ[6] किराततिक्तम् ।
योगत्रयं[7] शोफहरं नराणा-
मित्यौषधं शोफवतां प्रदिष्टम्[8] ॥ १६० ॥

---

१ 'तासां' घ. । २ 'गता न वलिं गता च' ङ. । ३ 'भिषक् तां' ख. घ. ङ. । ४ अस्याग्रे "अर्शोतिसारग्रहणीविकाराः प्रायेण चान्योन्यनिदानभूताः" इति ङ. पुस्तकेऽधिकः पाठः । ५ 'वाऽथ सदारुविश्वं' घ. । वाऽथ सडाडिमं वा' ङ. । ६ 'चाथ' ग. । ७ 'चूर्णं कवोष्णसलिलेन विलोड्य पीतं नातः परं श्वयथुरोगहरं नराणाम्' (?) ख. । 'योगत्रयं शोफहरं प्रदिष्टमित्यौषधं श्रेष्ठतमन्नराणाम्' ङ. । ८ अस्याग्रे ''कृष्णाग्निविश्वघनजीरककण्टकारिपाठा-निशाकरिकणामगधाजटानाम् । चूर्णं कवोष्णसलिलैरवलोड्य पीतं नातः परं श्वयथुरोगहरं नराणाम्'' इति घ. ङ. पुस्तकयोरधिकः श्लोकः ।

कथनपलशतं द्विपञ्चमूल्या
गुडतुलया च सहाभयाशतेन ।
गुडवदिति पचेदतीव्रवह्नौ
श्रृतमवतार्य ततः सुशी[1]तले च' ॥ १६१ ॥

त्रिकटुतुटिदलत्वचां च चूर्णं
सुरभि निधाय यवाग्रजं च किञ्चित् ।
[2]मृदु'मधुकुडवद्वयेन सार्द्धं
श्वयथुहरश्चरकोदितोऽवलेहः ॥ १६२ ॥

इति शोफचिकित्सा ॥

अथोदरचिकित्सा ॥

[3]रोही'तकत्वक्त्रिफलाद्रवन्ती-
दन्तीकषायः सकटु[4]त्रयश्च' ।
सयावशूकः सकलोदरघ्नः
स्नुक्पिप्पली वा सकलोदरघ्नी ॥ १६३ ॥

द्वौ क्षारौ लवणानि पञ्च हपुषा[5]धान्या'जगन्धाषठी-
व्योषाजाज्युपकुञ्चि[6]काक्रिमिजिता'कंकुष्ठकुष्ठाग्नयः ।
उग्राग्रन्थिककारवीमिसियुतं योज्यं फलानां त्रयं
मूलं पुष्करजं यवान्यपि भवेदेतानि तुल्यान्यथ ॥ १६४ ॥

त्रिवृद्विशाले द्विगुणे च दन्तिनी
त्रिसं[7]गुणा' स्याद्यवतिक्तका भवेत् ।
चतुर्गुणा' चूर्णमुदाहृतं [8]जनै'-
[9]रिदं हि नारायणमौषधं बुधैः' ॥ १६५ ॥

---

१ 'तळे तु' घ. । 'तळे वा' ङ. । २ 'अथ' ङ. । ३ 'रोही' ङ. । ४ 'त्रिकश्च' ग. घ. । ५ 'चव्या' घ. । ६ 'कांसिक्रमिजित्' (?) घ. । 'का च क्रमिजित्' ङ. । ७ 'गणा' ग. । ८ 'बुधैः' ङ. । ९ 'णपूर्वकं जनैः' ङ. ।

उष्णोदकेन यवकोलकुलत्थतोयै-
स्तक्रेण मद्यदधिमस्तुसुरासवैर्वा ।
नारायणं प्रपिबतः सकलोदराणि
नश्यन्ति विष्णु[1]मिव दैत्यगणा द्विषन्तः' ॥ १६६ ॥

पटोल[2]मूलं त्रिफलात्वचः क्षपा'
विळङ्गबीजं समषट्कमे[3]कशः' ।
सनीलिनीबीजपिचुत्रयं त्रिवृत्
पलं च कम्पिल्ल[4]पलार्द्ध'योजितम् ॥ १६७ ॥

[5]गवाम्बुपीतं' सकलोदरापहं
[6]पलोन्मितं शोफहरं प्रकीर्तितम्' ।
स[7]कामलं' पाण्डुगदं हलीमकं
[8]हरेत्' पटोलादि [9]भिषग्भिरुच्यते' ॥ १६८ ॥

कंकुष्ठसैन्धवफलत्रयनीलिनीभिः
कृष्णावचारुचकचि[10]त्रक'रोहिणीभिः ।
सत्रायमाणहपुषायवतिक्तकाभि-
श्चूर्णं त्रि[11]वृद्युतमिदं' सकलोदरघ्नम् ॥ १६९ ॥

[12]'रोहीतकत्वक्तुलया समेतं
द्विसं[13]गुणं' स्याद्बदराढकं च[14]' ।
पचेदपां द्रोणचतुष्टयेन
द्रोणावशेषेण घृताढकं च[15]' ॥ १७० ॥

---

१ 'णुरिव दैत्यगणान् निहन्ति' ङ. । २ 'मूलत्रिफलादलक्षपा' घ. ङ. । ३ 'कतः' घ. । ४ 'पलप्र' ख. । ५ 'घृतं विपक्वं' ङ. । ६ प्रकीर्तितं शोफहरश्च चूर्णितं' ख. । 'प्रकीर्तितं शोफहरं शरीरिणाम्' घ. । 'प्रकीर्तितं शोफहरं प्रलीढम्' ङ । ७ 'कामला' घ. 'कामिलं' ङ. । ८ 'जयेत्' घ. । ९ 'घृतं सपित्तम्' ङ. । १० 'तिक्तक' ख. घ. । ११ 'वृद्द्विगुणितं' ङ. । १२ रोहीतकेत्यादिश्लोकद्वयं नोपलभ्यते ङ. पुस्तके । १३ 'गणं' ग. । १४ 'तु' ख. । १५ 'तु' ख. ।

स्यात् पञ्चकोलात् पलपञ्चकेन
रोहीतकत्वक्समभागिकेन ।
सिद्धं तु रोहीतकसर्पिरेतत्
प्लीहोदरघ्नं यकृदामयघ्नम् ॥ १७१ ॥

द्विपञ्चमूलीजलमस्तुसिद्धं
सपञ्चकोलं च सयावशूकम् ।
सर्वोदरघ्नं घृतमेतदुक्तं
दुर्नामगुल्मग्रहणीगदघ्नम् ॥ १७२ ॥

इत्युदरचिकित्सा ॥

अथ गुल्मचिकित्सा ॥

हिंग्वग्नि[१]चव्य'लवणत्रयवेतसाम्ल-
क्षारद्वयत्रिकटुडाडिमतिन्त्रिणीकम् ।
सग्रन्थिकाग्निकषठीहपुष्पाज[२]गन्धा'-
पाठाभयाससितजीरकपुष्कराह्वम् ॥ १७३ ॥

सोग्रं सधान्यकमिति प्रविधाय चूर्णं
भूयः प्लुतं हि फलपूर[३]फलाद्द्रवेण' ।
उष्णोदकादिपरिपीतमिदं निहन्ति
शूलानि गुल्मगुदजग्रहणी[४]गदांश्च' ॥ १७४ ॥

हिंग्वादिभिर्विरहितैर्वचया विपक्क-
मतद्धृतं दधिचतुर्गुणमे[५]तदेव' ।

---

१ 'मन्थ' ङ. । २ 'मोद' ख. । ३ 'रसार्द्रमेतत्' ङ. । ४ 'विकारान्' ग. ङ. । ५ 'भिरेव' ख. । 'व कल्कैः' ङ. ।

स्याद्बीजपूरकरसेन चतुर्गुणेन
गुल्मापहं गुदरुजग्रहणीगदघ्नम्[1] ॥ १७५ ॥

श्यामा त्रिवृद्द्विफलत्रयञ्च
हरीतकीनां च शतार्द्धमन्यत्[2] ।
तोयार्मणार्द्धेन विपच्य तेन[3]
प्रस्थं पचेद्गव्यघृतस्य वैद्यः ॥ १७६ ॥

कम्पिल्लकं स्यात् प्रसृतप्रमाणं
सनीलिनीबीजपलद्वयं च[4] ।
चतुष्पलं स्नुकपयसश्च दत्वा
गुल्मापहं बिन्दुघृतं विरेकात् ॥ १७७ ॥

[5]त्रिवृत्पलं स्नुकपयसः पलं च[6]
कम्पिल्लकस्यापि पलं तृतीयम् ।
चतुष्पलं चामलकीरसस्य
शाणार्द्धमन्यल्लवणस्य चैव ॥ १७८ ॥

प्रस्थार्द्धमेभिर्हविषो विपक्वं
जले महाबिन्दुघृतं प्रसिद्धम् ।
[8]निहन्ति गुल्मं जठराणि चैव[7]
प्लीहानमप्याशु विरेकयोगात्[9][10] ॥ १७९ ॥

इति गुल्मचिकित्सा ॥

---

१ 'रुजाघ्नं' ङ. । २ 'मेतत्' घ. ङ. । ३ 'पाचितेन' घ. । ४ 'तु' घ. । ५ त्रिवृदित्यादि सार्द्धश्लोको नोपलभ्यते ङ. पुस्तके । ६ 'पलन्तु' ख. । ७ 'पलार्द्धं' घ. । ८ 'शोफं जठराणि शूलं' ङ. । ९ 'शु च साध्यरोगान्' ङ. । १० अस्याग्रे "सप्तसारपथ्यादिकषायद्वयमत्र हितं" इति ङ. पुस्तकेऽधिकः पाठः ।

अथ विद्रधिचिकित्सा ॥

कासीससैन्धवशिलाजतुहिंगुचूर्ण-
मिश्रीकृतो वरुणवल्कलजः[1] कषायः ।
अभ्यन्तरोत्थितमपक्वमतिप्रमाणं
नृणामयं जयति विद्रधिमुग्र[2]शोफम्[3] ॥ १८० ॥

पक्वेषु विद्रधिषु पूयमतिस्रवत्सु[4]
नाडीषु च व्रणिषु चापि भगन्दरेषु ।
स्याद्गण्डमालिषु फलत्रयगुग्गुलुः स्यात्
पथ्यं फलत्रिकघृतं लघुभोजनं च ॥ १८१ ॥

त्रीणि पलानि फलत्रितयस्य
द्वे च[5] पले तुलिते मगधायाः ।
पंच पलानि भवन्ति पुरस्य[6]
स्याच्च[7] फलत्रय[8]गुग्गुलुयोगः ॥ १८२ ॥

इति विद्रधिचिकित्सा ॥

अथ गण्डमालाचिकित्सा ॥

सकांचनारात्रिफलाजले[9] श्रृता
प्रशस्यते मागधिकाऽवचूर्णिता[10] ।
सगण्डमालागळगण्डरोगिणां[11]
फलत्रिकाद्यं[12] यवमुद्गभोजनम् ॥ १८३ ॥

---

१ 'वर्गकृतः' ङ. । २ 'गुल्म' ख. ३ 'रोगम्' ङ. । ४ 'मसृग्वमत्सु' ङ. । ५ 'तु' घ. । ६ 'पुरस्य भवन्ति' ङ. । ७ स्यात स' घ. । ८ 'त्रिक' ख. । ९ 'रात्रित्रिफलाजलेषु' ङ. । १० 'विचूर्णिता मागधिका प्रशस्यते' ङ. । ११ 'सगण्डमाले गळगण्डरोगिणि' ख. । १२ 'काज्यं' ग. घ. ।

तुम्बीरसेन कटुतैल'[1]चतुर्गुणेन
कल्कीकृतै[2]र्मगधजादिगणौ'षधैश्च ।
[3]तैलं शृतं हरति' देहिषु गण्डमाला-
मत्युल्बणामपि गळे गळगण्ड[4]रोगम्' ॥ १८४ ॥

इति गण्डमालाचिकित्सा ॥

अथ वि[5]स्फोट'चिकित्सा ॥

नि[6]म्बा'मृताब्दकटुकावृषधन्वयाष-
भूनिम्बपर्पटपटोलफलत्र[7]याणाम्' ।
क्वाथो नृणामिह भ[8]व'त्सु गतेषु पाकं
विस्फोटकेषु[9] विहितः' क[10]थितो' भिषग्भिः ॥ १८५ ॥

इति विस्फोटचिकित्सा ॥

अथ श्लीपदचिकित्सा ॥

विश्वौषधं वा क्वथितं गुळूची-
शृतं सुराह्वं क्वथितं [11]पिबेद्वा' ।
समाक्षिकं श्लीपदरोगवान् यः
सि[12]द्धार्थकास्तस्य हिताः' प्रलेपे ॥ १८६ ॥

इति श्लीपदचिकित्सा ॥

---

१ 'फटुकेन' ग. घ. ङ. । २ 'र्मगधिकादिगणौ' घ. । 'र्मगधजादिमह्यौ' ङ. । ३ 'पक्वं हविर्हरति' ख. । ४ 'रोगान्' ग. घ. ङ. । ५ 'पिटिका' ख. । ६ 'विश्वा' ख. । ७ 'त्रिकाणाम्' ख. घ. । ८ 'भवे' ख. घ. । ९ 'ष्वभिहितैः' ग. । १० 'पठितो' ख. घ. । ११ 'पयो वा' ख. । १२ 'सिद्धार्थिका तस्य हिता' ग. ।

अथ वातरक्तचिकित्सा ॥

युक्पञ्चमूलपयसा लघुपञ्चमूल्याः
काथेन वाऽमृतबलाकथितेन[1] वाऽपि ।
वाट्यालकस्य सलिलेन युतं शृतेन
पीतं शिलाजतु समीरणशोणितघ्नम् ॥ १८७ ॥

इति वातरक्तचिकित्सा ॥

अथ विसर्पचिकित्सा ॥

वाशाफलत्रयपटोलगुलूच्यरिष्टै-
रंभः शृतं सखदिरैः सुखकृद्विसर्पे[2] ।
लेपः शिरीषरजनीद्वयकुष्ठयष्टी-
मांसीनतैः सतुटिवाळकचन्दनैश्च[3] ॥ १८८ ॥

शिरीषयष्टीनतचन्दनैला-
मांसीहरिद्राद्वयकुष्ठवाळैः ।
लेपो दशाङ्गप्रसृतः प्रदेयो
विसर्पशोफज्वरशूलहारी ॥ १८९ ॥

इति विसर्पचिकित्सा ॥

अथ कुष्ठचिकित्सा ॥

त्रिफलापटोलपिचुमन्दवचा-
रुणयष्टिकासकटुकारजनि ।
नवभिः शृतं प्रपिबतः सलिलं
न भवन्ति पित्तकफकुष्ठरुजः ॥ १९० ॥

---

१ 'लताक्कथनेन' ग. घ. । २ 'कृद्वि पेयम्' घ. । ३ 'चन्दनवाळकैश्च' घ. ।

निम्बत्वक्त्रिफलापटोलकटुकादुस्पर्शदार्वीवृषा-
त्रायन्ती च सपर्पटैर्द्वि[1]'पलिकैर्द्रोण[2]मेभिः' पचेत् ।
ति[3]क्ता'ब्देद्रयवैः किरातमगधात्रायन्तिकाचन्दनैः
सिद्धं कुष्ठविघाति तिक्तकमिदं सर्पिर्विसर्पापहम् ॥ १९१ ॥

(भूनिम्बांबुदनिम्बवत्सककणात्रायन्त्यनन्तामृता-
तिक्ताभीरुफलत्रयप्रतिविषामूर्वाविशालावृषैः ।
पाठापर्पटसारिवाद्वयनिशायुग्यष्टिकापद्मकैः
सोशीरैः सपटोलचन्दनवचाशम्याकसप्तच्छदैः ॥ १९२ ॥

इत्येभिर्गदितैर्जलाष्टगुणितं प्रस्थं पचेत् सर्पिषो
गव्यस्यामलकीरसद्विगुणितं नाम्ना महातिक्तकम् ।
हन्त्येतद्गलगण्डमण्डलरुजः कण्डूः सपाण्ड्वामयाः
शोफश्लीपदवातरक्तविकृतीः कुष्ठानि चाष्टादश)[4] ॥ १९३ ॥

व्याघ्रीपटोलपिचुमन्दकरञ्जवाशा-
च्छिन्नोद्भवादिभिरिति सत्रिफलाभिराभिः ।
पक्वं हविर्हरति कुष्ठमिदं नराणा-
मष्टादशात्मकम[5]पि श्रुतवज्रकाख्यम्' ॥ १९४ ॥

[6]प्रक्काथयेत्' खदिरसारतुलाश्चतस्र-
स्तोयार्मणै रविकृतैः शुचिभिश्चतुर्भिः ।
क्वाथे तु[7]' तत्र विपचेद्घृतपात्रमेभिः
कल्कीकृतैरिति पिचुद्वितयप्रमाणैः ॥ १९५ ॥

---

१ 'त्रि' ङ. । २ 'णमध्ये' ङ. । ३ 'तेना' ग. । ४ 'भत्ताप्यामलकीरसं द्विगुणितं सर्पिर्विपक्वं परं हन्त्येतद्गलगण्डमण्डलरुजः कण्डून् सपाण्ड्वामयान् । शोफश्लीपदवातरक्तविकृतीः कुष्ठानि चाष्टादश ख्यातं तिक्तघृतं महामुनिमतं नातः परं कुष्ठिनाम् ॥' इति ङ. । ५ 'मिति पृथुवज्रकाख्यम्' ङ. । ६ 'निष्क्काथयेत्' घ. । प्रक्काथयेदित्यादि पञ्च श्लोका नोपलभ्यन्ते ङ. पुस्तके ७ 'ऽथ' ख. । 'न' घ. ।

त्रायन्तिकाकुटजबीजकरञ्जभूर्ज-
भूनिंबनिंबघनपर्पटकाटरूषैः ।
तिक्तापटोल्यमृतवल्ल्यभयाक्षधात्री-
गायत्रिपञ्चकनिशाद्वयचन्दनैश्च ॥ १९६ ॥

क्षुद्रेन्द्रदारुनृपवृक्षदुरालभाभिः
सप्तच्छदासनमसृणशुकद्रुमशिंशपाभिः ।
मूर्[1]वा'वरीमगधजामृगभोजिनीभिः
पाठावचाप्रतिविषासितशारिबाभिः ॥ १९७ ॥

एतन्महाखदिरसर्पिरिति प्रसिद्धं
त्वग्दोषिणामखिलकुष्ठविकारहारि ।
श्वित्रापहारि च किलास[2]गदा'तुराणां
मेदस्विनामपहरेदपि मेदुरत्वम् ॥ १९८ ॥

प्रमेहिणां मेहहरं [3]जडाना'-
मोजस्करं मध्यममेधसाञ्च ।
[4]मङ्गल्य'मायुःप्रदमन्यदस्मा-
न्न विद्यते पित्तकफामयघ्नम् ॥ १९९ ॥

खदिरसारकषायविपाचितं
कृतफल[5]त्रिक'कल्कमिदं घृतम् ।
हरति कुष्ठमथ त्रिफलामृता-
खदिरनिम्बपटोलवृषैः श्रृतम् ॥ २०० ॥

मरिचचन्दनदारुनिशा[6]द्वयै'-
र्नलदमेघशिलालशक्रद्रसैः ।
त्रिवृतयाऽश्व[7]हना'[8]कपयोवृषैः'
सुरभिमूत्रयुतैर्विपचेद्भिषक् ॥ २०१ ॥

---

१ 'दूर्वा' घ. । २ 'रुगा' ग. । ३ 'जनाना' ख. । ४ 'माङ्गल्य' ख. घ. । ५ 'लत्रय' ङ. । ६ 'मयै' ग. । ७ 'हरा' ख. घ. । ८ 'विषैः' ग. घ. ।

कटुकतैलमिदं मरिचादिकं
किटिभचर्म[1]'दला'लसकापहम् ।
[2]'बहळ'मण्डलसिध्मविचर्चिका-
प्रचुरकण्डुकिलासविसर्पजित् ॥ २०२ ॥

सतिल्वकविभीतकामलकसप्तलाशङ्खिनी-
पलाशतरुशिंशपाप्रभृतिभिः पृथक् प्रास्थिकैः ।
त्रिवृत्स्थविरदारुकज्वलन[3]मन्थ'पथ्यायुतै-
रमीभिरुदकार्मणढ्वितयपाचितैरेकशः ॥ २०३ ॥

पुनस्तत्रोत्तीर्णे शृतचरणशेषौषधजले
पलाशद्रोण्यन्तःस्थितवति च[4]' निर्वाप्य बहुशः ।
[5]'पुन'स्तप्त्वा तप्त्वा तरुणखदिराङ्गारनिकरै-
रयःपिण्डं तस्मिन्नयसि च विलीने घनतमे ॥ २०४ ॥

अयस्तुलागोमयपावकेन
संसाध्यते सिध्यति चात्र देयम् ।
अयःसमं मागधिकादिवर्गा-
[6]च्चूर्णं घृतक्षौद्रमतो' द्विभागम् ॥ २०५ ॥

इत्याशयैरप्रतिवारवीर्या-
शेषौषधायस्कृतिरुक्तमात्रा ।
प्रयुक्तया प्रत्यहमायुषश्च
देहस्य वर्णस्य भवेद्विवृद्धिः ॥ २०६ ॥

न चामयाः स्थौल्यमपि प्रमेहः
क्षयश्च कुष्ठानि नृणां न[7] सन्ति' ।

---

१ 'गदा' ङ. । २ 'बहुल' ग. घ. । ३ 'मेघ' ख. । ४ 'वि' ख. घ. । ५ 'तत' ग. घ. । ६ 'च्चूर्णीकृतं क्षौद्रघृत' घ. । ७ 'भवन्ति' घ. ।

न पाण्डुता श्लीपद[1]रुक्च न' स्या-
दूर्वोर्न च स्तम्भरुजः कदाचित् ॥ २०७ ॥

इति कुष्ठचिकित्सा ॥

अथ श्वित्रचिकित्सा ॥

विभीतकत्वङ्मलयूजटानां
क्वाथेन पीतं गुळसंयुतेन
अवल्गुजं बीजमपाकरोति
श्वित्राणि कृच्छ्राण्यपि पुण्डरीकम् ॥ २०८ ॥

शङ्खिन्याः काकमाच्याश्च [2]वायस्या'श्च [3]तुलाः' पृथक् ।
लोहचूर्णाढकार्द्धं [4]च' त्र्याढकी त्रिफला भवेत् ॥ २०९ ॥

अब्द्रोणद्वितये क्वाथः शेषः षोडशभागिकः ।
[5]सर्पिः'प्रस्थं पचेत्तेन कर्षमात्रप्रयोजितैः ॥ २१० ॥

व्योषवाकुचिकाव्याघ्रीदन्तीदारुकलिङ्गकैः ।
भृङ्गशम्याकव[6]रुणैः' पारावतपदीयुतैः ॥ २११ ॥

परं श्वित्रापहं चैतन्नीलं नाम घृतं स्मृतम् ।
[7]कुष्ठानि' हन्ति सर्वाणि कपालव्याधिनाशनम् ॥ २१२ ॥

काकाह्वा मदयन्तिका ससुरसा शम्याकसंयोजिता
ह्येतास्तु त्रिफलाढकत्रययुताः कल्प्यास्तुलाभागिकाः ।
दन्तीचित्रककाकमाचिवरुणक्षुद्राहरिद्राद्वयै-
'[8]रेभिश्चापि' सकौटजैः सखदिरैः [9]सर्वैस्तुला कल्पिता' ॥ २१३ ॥

---

१ 'रुङ्न च' ख. घ. । २ 'वार्कस्या' घ. । ३ 'तुला' ग. । ४ 'तु' घ. । ५ 'घृत' ख. । ६ 'वरुण' घ. । ७ 'श्वित्राणि' ख. । ८ 'रित्येभिश्च' ख. घ. । ९ 'सार्कैस्तुलाकल्पितैः' घ. ।

तोयद्रोणचतुष्टयेन विपचेत् पादावशेषे घृतात्
पात्रं चात्र[1] सगोशकृद्रसदधिक्षीरं समूत्रं पृथक् ।
भूनिंबत्रिकटूलपलैः पलमितैः श्यामाकरञ्जेङ्गुदी[2]-
निंबावल्गुजशिग्रुबीजसहितैर्न्नीलीसमायोजितैः ॥ २१४॥

एतन्महानीलमिति प्रसिद्धं
श्वित्रापहं कुष्ठगदापहञ्च ।
सर्पिर्विसर्पव्रणविद्रधिघ्नं
चोन्मादरोगघ्नमपस्मृतिघ्नम् ॥ २१५ ॥

अर्शांसि शोषमुखदन्त[3]शिरोविकारान्
वल्मीकगुल्मगळगण्डगळामयांश्च[4] ।
ग्रन्थ्यर्बुदश्वयथुमारुतरक्तमह-
मोहान् हरेद्बहुविधान् विषमज्वरांश्च ॥ २१६ ॥

[5]अरुष्करं चित्रकसोमराजी-
स्नुहीपयोवायसपादिकाश्च ।
एभिः समस्तैः सह पाचनीयं
तैलं खरांशोः किरणैर्यथावत् ॥ २१७॥

योज्याञ्जनं तेन करोति पथ्यं
तक्रेण चाश्नाति च सोमराजीम् ।
काकाभिधोदुम्बरिकासमेतां
कुष्ठं सितं नश्यति तस्य मासात् ॥ २१८ ॥

इति श्वित्रचिकित्सा ॥

---

१ 'चापि' घ. । २ 'गुदैः' ख. । ३ 'मुपदंश' ग. घ. । ४ 'मयं च' ख. । ५ 'अरुष्करमित्यादि श्लोकद्वयं ग. घ. पुस्तकयो-र्नास्ति ।

अथ प्रमेहचिकित्सा ॥

मुस्तेन्द्रदारुत्रिफलाकषायः
प्रमेहहृन्मेहवतां [1]नराणाम्' ।
धात्रीफलक्राथयुतः क्षपायाः
कल्कोऽथवा माक्षिकसंप्रयुक्तः ॥ २१९ ॥

दन्तीदारुशठीशिलाटुदहनैर्भल्लातकार्काभया-
स्नुग्वर्षाभुकरञ्जयुग्मवरुणैर्युक्पञ्च[2]मूलीयुतैः' ।
इत्येभिर्दशपालिकैः शृतमपां द्रोणे पृथक् प्रास्थि[3]कै-
रेभिश्चापि' कुलत्थकोलकयवैः पादावशेषीकृतम् ॥ २२० ॥

तस्मिन्नीपविडङ्गरोहिषकणाकम्पिल्लविश्वौषधै-
र्भार्ङ्गीचव्यगजाह्वपिप्पलि[4]युतैरेभिश्च सिद्धं घृतम्' ।
एतन्मेहहरं क्षतक्षयहरं हिध्मापहं [5]गुल्महृत्'
पाण्डुत्वप्रतिघाति हृद्गुद[6]रुज'प्रध्वंसि धान्वन्तरम् ॥ २२१ ॥

इति प्रमेहचिकित्सा ॥

अथ पाण्डुचिकित्सा ॥

सग्रन्थिकाब्दचविकासुरदारुदार्वी-
माक्षीकधातुभिरिदं सविडङ्गभागैः ।
चूर्णं कटुत्रिकफल[7]त्रय'चित्रकैश्च
मण्डूरकं द्विगुणमष्टगुणञ्च मूत्रम् ॥ २२२ ॥

पक्त्वाऽवलेहवदनेन कृताः प्रयुक्ता
मण्डूरकाख्यवटकास्त्व[8]नु'पीत[9]तक्राः' ।
पाण्ड्वामयं श्वयथुयुक्तमपि प्रमेहं
बाधिर्यमूरुजडतां च जयन्ति जन्तोः ॥ २२३ ॥

---

१ 'जनानाम्' ख. घ. । २ 'मूलैर्युतैः' ख. । ३ 'कैः प्रत्येकं तु' ग. । ४ 'युतैः प्रस्थं पचेत् सर्पिषः' घ. । ५ 'गुल्मजित्' ख. । ६ 'गद' ग. । ७ 'त्रिक' ख. । ८ 'अनु' ग. । ९ 'तक्रम्' ख. ।

कृत्वाऽग्निवर्णं मलमायसं च[1]
मूत्रेऽभिसिञ्चेद्बहुशो गवान्तु[2] ।
तत्रैव सिन्धूत्थसमं विपाच्य[3]
निरुद्धधूमन्तु[4] विभीतकाग्नौ ॥ २२४ ॥

तक्रेण पीतं[5] मधुनाऽथवाऽपि
विभीतकाख्यं लवणं प्रयुक्तम् ।
पाण्ड्वामयिभ्यो हितमेतदस्मात्
पाण्ड्वामयघ्नं न हि किञ्चिद[6]न्यत् ॥ २२५ ॥

सत्र्यूषणानि सफलत्रय[7]चित्रकाणि
साम्भोधराणि सविळङ्गफलानि च स्युः ।
कर्षाणि लोहरजसश्च नवेति चूर्ण-
मेतन्नवायसमिदं मधुना विलिह्यात्[8] ॥ २२६ ॥

न स्युः प्रमेहपिटका न च पाण्डुरोगाः
स्थौल्यं तनोः[9] स्थविरता न च शीघ्रमेति ।
नो कुष्ठरुग्जठरता जठरस्य नैव
नाग्नेरपाटवमनेन नवायसेन[10] ॥ २२७ ॥

इति पाण्डुचिकित्सा ॥

---

१ 'तु' ख. । २ 'गवाक्ष' ग. घ. । ३ 'च्यं' ग. । ४ 'स' ग. घ. । ५ 'युक्तम्' ग. । ६ 'दस्ति' घ. । ७ 'त्रिक' ख. । ८ 'नाऽवलेह्यम्' ख. । ९ 'न च' ग. । १० अस्याग्रे "माक्षीकं त्रिफला तिलास्त्रिकटुकं मुस्ता चतुर्ज्जातकं जन्तुघ्न मगधाजटा सुरतरु द्राक्षा निशे द्वे शटी । कर्षांशानि यवानिवह्निवराजाजिद्वयांभोरुहः (?) लोहादर्द्धपलं सिता द्विपलिका किट्टं तु सर्वार्द्धतः ॥ चूर्णं सूक्ष्मतमं विधाय मथितेनालोड्य वा प्राशितं क्षौद्रेणानिलजा रुजस्तु सकलाः श्वासप्रसेकामयान् । शूलश्लीपदविद्रधींश्च जठराण्यर्शांसि मन्दाग्नितां हन्यादामसमीरपाण्डुनिचयं कासं क्षयं मेहनुत् ॥" इति घ. पुस्तकेऽधिकः पाठः ।

अथ श्वासचिकित्सा ॥

द्वि[1]पञ्चमूलीतुलया समेतं
शतं प्रकल्प्यं द्विजयष्टिकायाः ।
हरीतकीनां तु[2] शतं जलस्य
द्रोणद्वयेन प्रपचेद्विधिज्ञः ॥ २२८ ॥

क्वाथे च तत्रैव हरीतकीस्ताः
स्विन्नाः समेतास्तुलया गुळस्य ।
पक्त्वाऽवलेहे शिशिरे च तस्मिन्
क्षौद्रं क्षिपेदष्टपलप्रमाणम् ॥ २२९ ॥

फलत्रयञ्च त्रिकटो[3]र्वि[3]चूर्ण्य
पलं चतुर्जातकभेषजानाम् ।
इत्यश्विनोर्भार्ङ्ग्यभयावलेहः
प्रयुक्तमात्रोऽयमिहाचिरेण ॥ २३० ॥

श्वासं जयेत् पञ्चविधञ्च कासं
शोषं षडेकादशरूपमुग्रम्[4] ।
हिक्कां कफं छर्दिमुरोविकार-
मरोचकं मेहमपस्मृतिं च ॥ २३१ ॥

इति श्वासचिकित्सा ॥

अथ कासचिकित्सा ॥

व्याघ्रीशतं स्यादभयाशतं च
द्रोणे जलस्य प्रपचेत् कषायम् ।
तुलाप्रमाणेन गुळेन युक्तं
पक्त्वाऽभयाभिः सह ताभिरत्र ॥ २३२ ॥

---

१ 'युक्' घ. । २ 'च' ग. घ. । ३ 'कटु वि' ख. । ४ 'मुग्र-रूपाम्' ख. । 'मुग्ररूपम्' ग. ।

शीते क्षिपेत् षण्मधुनः पलानि
पलानि च त्रीणि कटुत्रय[1]स्य ।
त्वक्पत्रकैलाकरिकेसराणां
चूर्णात् पलं चेति विदेहदृष्टः ॥ २३३ ॥

क्षुद्रावलेहः कफजान् विकारान्
सश्वासशोषानपि पञ्चकासान् ।
हिक्कामु[2]रोरोग[2]मपस्मृतिं च
हन्याद्धिवृद्धिं च करोति वह्नेः ॥ २३४ ॥

चत्वार्यत्र शतानि चित्रकजटायुक्पञ्चमूलामृता-
धात्रीणामुदकार्मणैस्त्रिभिरपां द्रोणेन च क्काथयेत् ।
पादस्थे कथने गुळस्य च शतं पथ्याढकेनान्वितं
पक्कव्यं श्रृतशीतळे च मधुनः प्रस्थार्द्धमात्रं क्षिपेत् ॥ १३५ ॥

व्योषस्य त्रिसुगन्धकस्य च पलान्यत्रैव षट् प्रक्षिपेत्
क्षारस्यार्द्धपलं रसायनमिदं संसेव्यते सर्वदा ।
शोषश्वासबलासकासवमथुश्लेष्मप्रतिश्यायिभिः
क्षीणोरःक्षतहिक्किभिः कफशिरोरुग्भिः प्रणष्टाग्निभिः ॥ २३६ ॥

क्काथस्य कंसमुपकल्प्य रसस्य चापि[3]
व्याघ्रीलताऽमृतलताद्वितयोद्भवस्य ।
तन्मूलतः पलचतुष्टयमत्र कल्कः
सर्पिःपलानि पंच[4] षोडश तत्[4] प्रसिद्धम् ॥ २३७ ॥

व्याघ्रीघृतं मधुयुतं विधिवत् प्रपक्क[5]-
मेताग्निहन्ति कफकासमपीनसञ्च ।

---

१ 'त्रिक' ख. । २ 'मुरोरोध' घ. । ३ 'वाऽपि' घ. । ४ 'दश षोडश षट्' ख. ग. घ. । ५ 'प्रयुक्त' घ. ।

भार्ङ्गीहविर्हरति पूर्ववदेव पक्वं
श्वासं वृषस्य च हविः[1] सहसाऽस्रपित्तम्' ॥ २३८ ॥

इति कासचिकित्सा ॥

अथ रक्तपित्तचिकित्सा ॥

कल्केन यष्टीमधुकस्य सर्पि-
र्विदारिकन्दद्रवदुग्धसिद्धम् ।
सशर्करं नागबलाविदारी-
शतावरीभिश्च पृथग्विपक्वम् ॥ २३९ ॥

दूर्वा[2]विदारीक्षुशतावरीणां
रसैरुशीरोत्पलशर्कराभिः ।
मृद्वीकया राजकशेरुकैर्वा[3]
विपक्वमाज्यं पयसा[4]ऽस्रपित्ते ॥ २४० ॥

नीलोत्पलांबुरुहकेसरमृत्प्रियंगु-
लोद्ध्राञ्जनानि मधुना सितया युतानि ।
पीतानि वाशककषायपरिप्लुतानि
घ्नन्ति प्रवृत्तमपि शोणितपित्तरोगम् ॥ २४१ ॥

कूश्माण्डकात् पलशतं कुडवैश्चतुर्भि-
र्भृष्टं घृतादनु पचेत् समखण्डमेतत् ।
विश्वाह्वजीरककणापलषट्कयुक्तं
त्वङ्नागपुष्पलुटिपत्रपलद्वयेन ॥ २४२ ॥

एतत् पुराणमधुनः कुडवद्वयेन
संयोजितं जयति जन्तुषु रक्तपित्तम् ।
ऊर्ध्वप्रवृत्तमपि गुह्यगुदप्रवृत्त-
मस्मात् परं भुवि भवेदपरं न हृद्यम् ॥ २४३ ॥

---

१ 'घृतं खलु रक्तपित्तम्' घ. । २ 'मूर्वा' ख. । ३ 'श्च' घ. ।
४ 'सहस.' ख. ।

मूत्रस्य कृच्छ्रमरुचिं च वमिं सतृष्णां
मूर्च्छामपस्मृतिमुरःक्षतमूर्ध्ववातम् ।
उन्मादमप्यपहरेदति[1]वृष्यमर्शो-
रक्तात्मकश्च शमयेद्विदधाति बुद्धिम् ॥ २४४ ॥

[2]एलावराङ्गमपि पत्रकमेतदर्द्ध-
कर्षांशकं मगधजार्द्धपलं प्रकल्प्यम् ।
मृद्वीकया च[3] सितया मधुकेन युक्तं[4]
खर्ज्जूरकेण च पलप्रमितैश्चतुर्भिः ॥ २४५ ॥

एलादिका मधुयुता गुळिकाऽतिहृद्या
वृष्या तृषं प्रशमयेदथ[5] रक्तपित्तम् ।
वक्षःक्षते च पठिताऽर्शसि रक्तजे च
मूर्च्छासु च भ्रमिषु[6] शस्ततमा नराणाम् ॥ २४६ ॥

इति रक्तपित्तचिकित्सा ॥

अथ तृष्णाचिकित्सा ॥

[7]लाजाब्जबीजाञ्जनमुत्पलं च
न्यग्रोधरोहः सबिसः सकुष्ठः ।
क्षौद्रेण युक्तो वटकीकृतश्च
तृष्णाभिघाताय मुखेन धार्यः ॥ २४७ ॥

लाजाब्जलामज्जमृणाळिकाभिः
शृङ्गाटनीलाब्जकशेरुभिश्च ।

---

१ सश्वासमप्यपहरेदपि' ख. । २ 'एलेत्यादि श्लोकद्वयं तृष्णाचिकित्सायां दृश्यते घ. पुस्तके । ३ 'स' ख. । ४ 'युक्ता' ख. । ५ 'दपि' ख, घ, । ६ 'विभ्रमिषु' ग. । ७ लाजाब्जेत्यादि विंशच्छ्लोका नोपलभ्यन्ते ग. पुस्तके ।

शृतं पयः पीतमनुष्णमेत-
त्तृष्णाहरं क्षौद्रसितासमेतम् ॥ २४८ ॥

इति तृष्णाचिकित्सा ॥

अथ छर्दिचिकित्सा ॥

पथ्याक्षधात्रीमगधोषणानां
चूर्णं सलाजाञ्जनकोलमज्जम् ।
छर्दिं छिनत्याशु समाक्षिकं तु
सत्र्यूषणं वाऽथ कपित्थमध्यम् ॥ २४९ ॥

[1]एलालवङ्गकरिकेसरकोलमज्जा-
लाजाप्रियंगुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लिह्या-
च्छर्दिं छिनत्ति कफमारुतपित्तजां च ॥ २५० ॥

इति छर्दिचिकित्सा ॥

अथ हिक्काचिकित्सा ॥

वसन्तदूत्याः[2] कुसुमं फलं च
सगैरिका तिक्तकरोहिणी च ।
योगद्वयं क्षौद्रसमन्वितं च
हिक्काहरं चाद्भुतभाषणं च[3] ॥ २५१ ॥

इति हिक्काचिकित्सा ॥

---

१ एलेत्यादिश्लोको नोपलभ्यते ख. ग. पुस्तकयोः । तत्स्थाने "सुनप्रदेशसम्भूतजम्बूमूलसमन्विता । त्वक्च पिप्पलिका कृत्वा वह्नितप्तजले क्षिपेत् ॥ तत्पयः पीतमात्रं तु वमिहिक्कातृषां जयेत् । ह्रीबेरस्य गुळूच्या वा कषायो मधुसंयुतः ॥ पीतश्छर्दिं जयेच्छीतो मूर्छां वा तण्डुलाम्बुना" इति पाठो दृश्यते ।
२ 'दूती' घ. । ३ 'हि' घ. ।

अथ शूलचिकित्सा ॥

विश्वौषधेन रुचकेन सदाडिमेन
स्यादम्ळवेतसयुतं कृतहिंगुभागम् ।
तद्धिंगुपञ्चकमिदं हृदयामयघ्नं
भेडाभिधानमुनिना गदितं मुनीनाम् ॥ २५२ ॥

व्योषाजमोदयुतजीरकयुग्मसिन्धु-
चूर्णं सरामठविभागमपि[1] प्रयुक्तम् ।
हिंग्वष्टकं हरति[2] हृज्जठरान्तराळ-
शूलानि गुल्मगुदजग्रहणीविकारान् ॥ २५३ ॥

सविश्वसौवर्चलहिंगुचूर्ण-
मुष्णाभिरद्भिः परिपीतमेतत् ।
हृत्पृष्ठकोष्ठान्तरवंक्षणान्तः-
शूलं जयत्याशु मरुत्कफोत्थम् ॥ २५४ ॥

चूर्णं तदेतदिति तुम्बुरुपुष्कराह्व-
पथ्याम्ळवेतसविडं रुचकं सहिंगु ।
सिन्धूद्भवेन सहितं यववारिपीतं
शूलापतन्त्रकविकारहरं यदुक्तम् ॥ २५५ ॥

रुग्यावशूकविळडाडिमतिन्त्रिणीक-
सिन्धूत्थहिंगुहुतभुक्सितकृष्णजीरैः ।
सग्रन्थिकैः सचविकारुचकाजमोदै-
र्व्योषाम्ळवेतसयुतैरिति कल्कपिष्टैः ॥ २५६ ॥

तद्बीजपूरकरसेन चतुर्गुणेन
दध्ना च दाधिकमिति[3] प्रवदन्ति तद्ज्ञाः ।

---

१ 'मिदं' घ. । २ 'भवति' ख. । ३ 'कमिदं श्टतमाज्य-मुक्तम्' घ. ।

हृत्पृष्ठकोष्ठगुदवंक्षणवस्तिशूल-
मर्शांसि गुल्ममपहन्ति घृतं विशेषात्[1] ॥ २५७ ॥

क्षारद्वयं त्रिकटुकं त्रिफला हरिद्रा-
युग्दारुमुस्तलवणत्रयतुम्बरूणि ।
सग्रन्थिकानि तुटिचित्रकचव्यकुष्ठ-
माक्षीकपुष्करविळङ्गविषायुतानि ॥ २५८ ॥

यावन्त्यमूनि गजपिप्पलिसंयुतानि
तावत्प्रमाणमिव गुल्गुलुसंयुतानि[2] ।
कृत्वा घृतेन गुडिका मनुजैः प्रयोज्या[3]
पीतानुदुग्धजलकाञ्चिकमुद्गयूषैः ॥ २५९ ॥

पाण्ड्वामयं क्षयमपस्मृतिमूर्ध्ववात-
मुन्मादमामपवनं श्वयथुं प्रमेहम् ।
हृत्पृष्ठकोष्ठकटि[4]वंक्षणकुक्षिकक्ष-
शूलानि नाशयति कुष्ठकिलासरोगान् ॥ २६० ॥

इति शूलचिकित्सा ॥

अथोदावर्तचिकित्सा ॥

गोमूत्रराज[5]फलरामठदन्तिनीभिः[6]
कंकुष्ठसैन्धवविळैश्च गुडप्रगाढैः ।
आगारधूमसहितैरिति वर्तिरेषा
न्यस्ता गुदे ग्रथितविट्कगुदामयघ्नी ॥ २६१ ॥

इत्युदावर्तचिकित्सा ॥

---

१ 'विशेषतश्च' घ. । २ 'णमिति गुल्गुलुमिश्रितानि' घ. । ३ 'प्रयुंज्यात्' घ. । ४ 'पार्श्वपृष्ठकटि' घ. । ५ 'राठ' घ. । ६ 'नीलिनीभिः' घ. ।

अथ मूत्रकृच्छ्रचिकित्सा ॥

तुटिहरेणुकणावृषयष्टिका-
त्रिकटकोरुबुकोपलभेदिभिः ।
शृतमिदं जलमश्मजतूत्कटं
जयति साश्मरिमूत्रविनिग्रहम् ॥ २६२ ॥

इति मूत्रकृच्छ्रचिकित्सा ॥

अथ क्षयचिकित्सा ॥

शोषातुरस्य ज्वररक्तपित्त-
कासारुचिश्वाससमन्वितस्य ।
विड्भेदिनश्चापि हतस्वरस्य
क्रिया न कार्या कुशलैर्भिषग्भिः ॥ २६३ ॥

वित्तान्वितस्यात्मवतश्च[1] जन्तो-
रमन्दवह्नेरचिरामयस्य ।
बलोपपन्नस्य सतश्चिकित्सा
चिकित्सकैः कस्यचिदेष दृष्टा ॥ २६४ ॥

द्विपञ्चमूलीजलसिद्धमाज्यं
वाशाघृतं वाऽप्यथ षट्पलं वा ।
हितं पयश्छागलमस्य गोर्वा
प्रशस्यते[2] नागबलाभिधानम् ॥ २६५ ॥

[3]शृङ्गीतामलकीफलत्रिकबलाच्छिन्नाविदारीशठी-
जीवन्तीदशमूलचन्दनघनैर्नीलोत्पलैलावृषैः ।
मृद्वीकाष्टकवर्गपौष्करयुतैः' सार्द्धं पृथक् पालिकै-
र्द्रोणेन शतानि पञ्च विपचेत् धात्रीफलानामतः ॥ २६६ ॥

---

१ 'वतोऽपि' घ. । २ 'प्रयुज्यते' घ. । ३ 'शृङ्गीतामलकीकणोत्पलबलावर्याष्टवर्गान्विताजीवन्तीतुटिचन्दनागरुशटीद्राक्षाविदार्यबुदैः । वर्षाभूदशमूलपौष्करवृषैः' घ. ।

उद्‌धृत्यामलकानि तैलघृतयोष्षड्भिश्च षड्भिः पलै-
र्भृष्टान्यर्द्धतुलां निधाय [1]'विधिवन्म'त्स्यण्डिकायाः पचेत् ।
शीते षण्मधुनः पलानि कुडवो वांश्याश्चतुर्ज्जातका-
न्मुष्टिर्मागधिकापलद्वयमयं प्राशः स्मृतश्च्यावनः ॥ २६७ ॥

न शोषः साफल्यं व्रजति वपुषि क्षीयमाणेऽपि जन्तो-
र्न्न मूर्च्छा नो छर्दिस्तृडपि च न च श्वासकासादयश्च ।
न चालक्ष्मीर्विघ्नं क्वचिदपि न च व्यापदः संभवन्ति
प्रयोगादेतस्मान्मनसि न धियो विभ्रति भ्रान्तिमन्तः ॥ २६८ ॥

प्रसरति पुरः प्रज्ञा क्षेये जरा जडतां व्रजेत्
विदधति पदं नैवाकस्माद्वलीपलितानि च ।
भवति न भयं रुग्भ्यः काये [2]'नं चास्पद'माप्नुयु-
श्च्यवनरचितप्राशप्राशाद्पुण्यशतान्यपि ॥ २६९ ॥

द्राक्षाजमांसरसदुंग्धविदारिकेक्षु-
धात्रीवरीरससमं विधिवद्विपाच्य ।
प्रस्थं घृतात् समधुकाष्टकवर्गभार्ङ्गी-
वीरावरीबदरनागबलाबलाभिः ॥ २७० ॥

द्राक्षाकशेरुकपरूषकनाळिकेर-
श्रृङ्गाटकोत्पलप्रियाळमधूळिकाभिः ।
श्रृङ्गीमृणाळकपिकच्छुकणाशठीभिः
सौम्यान्विताभिरिति शारिबया युताभिः ॥ २७१ ॥

शीते परेऽह्नि सिताऽर्द्धतुलासमेतं
प्रस्थार्द्धमात्रमधुनो मगधापले द्वे ।
दत्वाऽर्द्धपालिकमितोषणनागपुष्प-
प्रथ्वीवराङ्गदलचूर्णयुतः [3]'प्रयोज्यः' ॥ २७२ ॥

---

१ 'विधिना म' ख. । २ 'किमास्पद' ग. । 'न वाऽस्पद' घ. ।
३ 'प्रयुक्तः' घ. ।

शस्तः शोषवतामपस्मृतिवतामुन्मादिनां मोहिनां[1]
हिक्काकामलिनामरोचकवतां सश्वासिनां कासिनाम् ।
ऊर्ध्वासृक्प्रदरप्रमूढमनसां हृद्रोगिणां गुल्मिनां
क्षीणानामुरसो भिषग्भिरमृतप्राशः प्रकाशीकृतः ॥ २७३ ॥

त्रीन् वारान् प्रथमं शिलाजतुजले भाव्यं भवेत्त्रैफले
निष्काथे दशमूलजे[2] च तदनु छिन्नोद्भवाया रसे ।
वाट्यालक्कथने पटोलसलिले यष्टीकषाये पुन-
र्गोमूत्रे च पयस्यथापि च गवां चैषां[3] कषाये ततः ॥ २७४ ॥

द्राक्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिरापौष्करैः
पाठाकौटजकर्कटाक्षकटुकारास्नाम्बुदालम्बुसैः ।
दन्तीचित्रकचव्यवाशक[4]कणावीरा[5]ष्टवर्गौषधै-
रब्द्रोणे चरणस्थिते पलमितै[6]रेभिः शृतैर्भावयेत् ॥ २७५ ॥

धात्रीकर्कटशृंगिका[7] त्रिकटुकैरेभिः पृथक्पंचभि-
र्द्रव्यैश्च द्विपलोन्मितैरपि पलं चूर्णाद्विदारी भवेत् ।
तालीसात् कुडबं चतुष्पलमिह प्रक्षिप्यते सर्पिषः
तैलस्य द्विपलं पलाष्टकमथ क्षौद्रात् भिषग्योजयेत्[8] ॥ २७६ ॥

तुल्यं पलैः षोडशभिः सिताया-
स्त्वक्क्षीरिकापत्रककेसरैश्च ।
बिल्वांशकैस्त्वक्तुटिसम्प्रयुक्तै-
रित्यक्षमात्रा गुळिका प्रकल्प्या[9] ॥ २७७ ॥

तासामेकतमां प्रयुज्य विधिवत् प्रातः पुमान् भोजनात्
प्राग्वा मुद्गदलाम्बुजांगलरसं शीतं शृतं वा जलम् ।

---

१ 'मेहिनाम्' ख. घ. । २ 'लजेऽथ' ख. घ. । ३ 'एषाम्' घ. । ४ 'वारण' घ. । ५ 'जीरा' ख. । ६ 'द्विपलितै' ख. । ७ 'मेषविषाणिका' ग. घ. । ८ 'पृथग्योजयेत्' घ. । ९ 'विधेया' ख. ।

माद्वीकं[1] मदिरामगुर्वशनभुक् पीत्वा पयो वा गवां
प्राप्नोत्यंगमनंगवत् सुभगतासम्पन्नमानन्दकृत् ॥ २७८ ॥
शोफ[2]ग्रन्थ्यवमन्थवेपथुवमीपाण्ड्वामयश्लीपद-
प्लीहार्शःप्रदरप्रमेहपिटकामेहाश्मरीशर्कराः ।
हृद्रोगार्बुदवृद्धिविद्रधियकृद्योन्यामयामानिला-
नूरुस्तम्भभगन्दरज्वररुजस्तूनीप्रतूनीतृषः ॥ २७९ ॥
वातासृक् प्रबलं[3] प्रवृद्धमुदरं कुष्ठं किलासं कृमीन्
कासं श्वासमुरःक्षतं क्षयमसृक्पित्तं सपानात्ययम् ।
उन्मादं मदमप्यपस्मृतिमतिस्थौल्यं कृशत्वं तनो-
रालस्यं च हलीमकं च शमयेन्मूत्रस्य कृच्छ्राणि च' ॥ २८० ॥

झटिति जरया सर्वस्वे[4]तरकालजराकृतै[5]-
वृतमळिकुलाकारैरेभिः शिरश्च शिरोरुहैः ।
बलि[6]वदवलिव्यस्तातङ्कं वपुश्च समुद्वहन्
प्रभवति[7] शतं स्त्रीणां गन्तुं जनो जनवल्लभः ॥ २८१ ॥
स्तिमितमतिरप्यज्ञानान्धः सदस्यपटुः पुमान्
सकृदपि स तु[8] ज्ञानोपेतः श्रुतिस्मृतिमान् भवेत् ।
व्रजति च यथायुक्तो योगी शिवस्य समीपतां
शिवगुळिकया कस्तामेतां करोति न मानवः[9] ॥ २८२ ॥

फलत्रयक्काथविशुद्धमादौ
शुद्धं गुळूच्या दशमूलशुद्धम् ।
स्थिरादिकाकोळियुगादिशुद्धं
शिलाजतु स्यात् क्षयिषु प्रशस्तम्[10] ॥ २८३ ॥

इति क्षयचिकित्सा ॥

---

१ 'माक्षीकं' घ. । २ 'शोष' घ. । ३ 'प्रदरम्' घ. । ४ 'ण्यपि' ख. । ५ 'वृतै' घ. । ६ 'वलि' ग. । ७ 'भवति च' घ । ८ 'यथा' ख. । ९. 'मानुषः' ख. घ. । १० 'प्रसिद्धम्' घ. ।

अथ कृमिचिकित्सा ॥

फञ्जीफणिज्जकफलत्रितयाखुकर्णी[1]-
काथः कृमिघ्नमगधाशिखिशिग्रुकल्कः ।
पीतः कृमीनपहरेत् कृमिजा रुजश्च
जन्तोर्जयेदथ कणाकृमिजित्कषायः ॥ २८४ ॥

इति कृमिचिकित्सा ॥

अथ वातचिकित्सा ॥

त्वङ्मांसशोणितगते पवने प्रशस्ता
शृङ्गेरसृक्स्रुतिरथासमन्वितेषु ।
रास्नामृतात्रिकटुकोरुबुकैस्सविश्वैः
सर्वाङ्गगे क्वथितमम्बु हितं समीरे ॥ २८५ ॥

[2]पक्वाशयस्थस्य समीरणस्य
बलादिनाऽन्वासनकर्म शस्तम् ।
[3]रस्नादिवस्तिप्रणिधान'मत्र
शतावरीतैलमथ प्रयोज्यम् ॥ २८६ ॥

तैलं वातहरं बलाजलपयःपक्वं वरीकुण्डली-
रास्नानागबलाबलामिसिपृथक्पर्णीस्थिरारेणुभिः ।
मञ्जिष्ठाष्टकवर्गचन्दननतैरेलाश्वगन्धागरु-
त्वग्यष्टीमधुपत्रकैस्सनलदैश्शैलेयरुग्दारुभिः ॥ २८७ ॥

रास्नायुक्पञ्चमूलीमदनफलबलामांसिपथ्याक्षधात्री-
क्वाथस्सोग्राब्दकृष्णामिसिफलफलिनीकुष्ठसिन्धूत्थकल्कः[4] ।
वस्तिस्सक्षीरमूत्रस्सतुषजलघृतक्षौद्रतैलस्समस्तु-
गुल्फस्फिग्जानुजङ्घाजघनभुजकटीपृष्ठकोष्ठा[5]निलघ्नः ॥ २८८ ॥

---

१ पर्णी' घ. । २ श्लोकोऽयं ख. पुस्तके नास्ति । ३ 'रास्नादिभिर्वस्तिविधान' घ. । ४ 'कल्कैः' ग. ५ 'कोष्ठपृष्ठा' घ. ।

मञ्जिष्ठासुरकाष्ठकुष्ठकुटिलैरेलालवङ्गागरु-
त्वक्पत्रैर्नख[1]नागपुष्पफलिनीकौन्तीवचाचन्दनैः ।
मांसीसर्जरसांबुभिस्ससरळैस्सोशीरशैलेयकै-
रित्येभिस्सवरीरसेन पयसा तैलं श्रृतं वातजित् ॥ २८९ ॥

रुग्दारुद्रविडीप्रियंगुतगरत्वक्पत्रकौन्तीनखै-
र्मांसीसर्जरसांबुचन्दनवचाशैलेयलामज्जकैः ।
मञ्जिष्ठासरळागरुद्विपबलारास्नाश्वगन्धावरी-
वर्षाभूमिसिसिन्धुभिः समधुरद्रव्यैश्च कल्कीकृतैः ॥ २९० ॥

एभिः क्षीरशतावरीरससमं तैलं विपक्वं मृदु
स्याद्वातघ्नमिदं नृणामिति वरीतैलं भिषक्पूजितम् ।
तद्वद्दुग्धसमन्वितानि सरणीसैरेय[2]रास्नामृता-
वाट्यालक्वथने[3] श्रृतानि च पृथक् तैलानि कुष्ठादिभिः ॥ २९१ ॥

एलाबलानळदचन्दनदारुसौम्या-
शैलेयकुष्ठकुटिलैस्स[4]शताह्वयैश्च ।
तैलं सदुग्धमिति सिद्धमभीरुजन
कन्दद्रवेण च समेन समीरणघ्नम् ॥ २९२ ॥

छिन्नोद्भवापलशतं सरणीशतं वा
रास्नाशतं सहचरादथवा बलायाः ।
द्रोणेऽम्भसः श्रृतमतोऽन्यतमे कषाये
पादस्थिते पयसि वाऽपि[5] चतुर्गुणेऽस्मिन् ॥२९३॥

लामज्जसर्जरसचोरकचन्दनैला-
शैलेयवाळकवचाफलिनीमुराभिः ।
त्वक्पत्रनागकुसुमागरुदारुमांसी[6]-
मञ्जिष्ठिकाकुटिलकुष्ठहरेणुकाभिः ॥ २९४ ॥

---

१ 'पत्रैर्नळ' घ. । २ 'सरणीशैलेय' ख घ. । ३ 'क्वथनैः' ग. घ. । ४ 'श्च' ग. । ५ 'चापि' घ. । ६ 'मांसियष्टी' घ. ।

वाट्यालकद्विपबलामिसिवाजिगन्धा-
गन्धर्वहस्तकपिकच्छुपुनर्नवाभिः ।
रास्नावरीसरळसैन्धवशारिबाभि-
र्युक्पर्णिनीमधुरभेषजसंयुताभिः ॥ २९५ ॥

इत्याभिरर्द्धपल[1]'भागविभाजिताभि-
स्तैलाढकं सयवकोलकुलत्थतोयम् ।
पक्कं पृथक् सदशमूलजलं[2]' जनाना-
मेतद्भिषग्भिरुदितं पवनामयघ्नम् ॥ २९६ ॥

यान्यत्र पञ्च कथितानि मया मृदूनि
तैलान्यमूनि पवनामयनाशनानि ।
सेव्यानि दुर्बलवपुर्बलवर्द्धनाय
योषिद्गमाय भुवि भूमिभुजां भवन्ति ॥ २९७ ॥

स्त्रीणां सुखप्रसवनाय च गर्भिणीना-
मुद्गाढगात्र[3]'गुरुगर्भभरालसानाम् ।
त्वङ्मार्दवाय वपुषि प्रमदाजनानां
दन्तोद्गमेषु च शिशोर्दशनोद्भवाय[4]' ॥ २९८ ॥

सहाचरबलात्रयं त्रिकटुवाजिगन्धावरी
सरण्युरुबुकुण्डली दशपला जलस्यार्मणे ।
विपाच्य चरणस्थिते पयसि भेषजानां जले
दधीक्षुरसमस्तुभिर्जतुरसेन शुक्तेन[5]' च[6]' ॥ २९९ ॥

नळदफलिनीरुङ्मञ्जिष्ठातुरुष्कसुरद्रुमै-
रगरुतगरत्वक्पत्रैलालवङ्गहरेणुभिः ।
असन[7]'सरळोशीरोदीच्यैः सचन्दनचोरकैः
सकरिकुसुमैः पक्कं तैलं दशाङ्गमिति स्मृतम् ॥ ३०० ॥

---

१ 'इत्यर्द्धबिल्वसम' ख. । २ 'रसं' घ. । ३ 'मात्र' ख. । ४ 'द्गमाय' ख. घ. । ५ 'शुक्तेन' ख. । ६ 'वा' ग. । ७ 'सनख' ख. घ. ।

दशाङ्गोक्तक्वाथैर्दशभिरपि तैलानि विधिवत्
सकल्कैः सक्षीरैः पृथगथ दशैतानि विपचेत् ।
मरुद्व्याधिघ्नानि स्थविरनृपतिस्त्रीशिशुकृश-
क्षतक्षीणोरस्कैर्नृभिरपि च सेव्यानि सुखिभिः ॥ २०१ ॥

प्रसारिणीशतमुदकार्मणे पचेत्
बलाशतार्द्धमपि सहाश्वगन्धया ।
वरीशठीशिखिदशमूलकुण्डली-
पुनर्नवामिसिमदलैः पलोन्मितैः[1] ॥ २०२ ॥

नतनखशिखिरास्नारुक्प्रियंगूग्रगन्धा-
लवणविळगुळूचीपिप्पलीरेणुकाभिः ।
समिसिमधुकमांसीक्षारविश्वौषधीभिः[2]
कुटजफलयुताभिर्मुष्टिमात्राभिराभिः ॥ २०३ ॥

शृतमिह सरणीजले सदुग्धं
सतुषजलं बलकारि तैलमेतत् ।
नृपतिवरविलासिनीजनान्तः-
पुरपतिमानिषु[3] सौकुमार्यकारि ॥ २०४ ॥

इदमिति मृदुकुब्जखंजपंगु-
प्रभृतिषु चाप्यपतानकार्दितेषु ।
प्रतिदिनमुपभुंज्यते[4] कृशाङ्ग-
वपुषि[5] समीरणसंकुचद्भिरङ्गैः ॥ २०५ ॥

इदं यतः पवनबलेन संकुचत्
प्रसारयत्यति कृशमङ्गमङ्गिनः ।
अतः सदा चरकपराशरादिभिः
प्रसारिणीशृतमिति तैलमर्चितम् ॥ २०६ ॥

---

१ 'पलीनकैः' ग. । 'प्रथकपलैः' घ. । २ 'धाभिः' घ. । ३ 'कामिषु' घ. । ४ 'योज्यते' ख. । ५ 'शांगे वपुषि' ख. ।

अब्द्रोणद्वितयै[1]र्बलासहचरच्छिन्नाश्वगन्धावरी-
गन्धर्वैः कपिकच्छुवारणकणायुक्पञ्चमूलीयुतैः ।
इत्येभिः सरणीशतेन सहितैश्छागार्द्ध[2]मांसेन तु[3]
क्वाथेऽस्मिन् दधिमस्तुकांचिकयुतं तैलं सशुक्तं शृतम् ॥ ३०७ ॥

मंजिष्ठाष्टकवर्गचन्दनवचामुस्ताशताह्वाकणा-
शुण्ठीसैन्धवपद्मकामयशठीलामज्जकेन्द्रद्रुमैः ।
रास्नाव्याघ्रनखानळैः समधुकैः कल्कैस्त्रिकर्षान्वितै-
रेतत् सर्वमरुद्विकारशमनं प्रोक्तं[4] विदेहादिभिः ॥ ३०८ ॥

तैलं शृतं ससरणीदशमूलमाष-
क्वाथैः स[5]शुक्तदधिकाञ्जिकसम्प्रयुक्तम्[6] ।
सक्षारगोक्षुरकणाशिखिविश्वरास्ना-
रुग्दारुरेणुकुटिलाष्टकवर्गगर्भम् ॥ ३०९ ॥

तुटिकुटिललवङ्गत्वक्प्रियंगूग्रगन्धा-
सरळदळशताह्वारुक्तुरुष्काहिपुष्पैः ।
सनख[7]नळदकौन्तीकुण्डलीक्वाथदुग्धैः
शृतमनिलगदघ्नं तैलमश्विप्रणीतम् ॥ ३१० ॥

[8]माषातसीयवकुरण्टककण्टकारी-
गोकण्टटिण्डुकजटाकपिकच्छुतोयैः ।
कार्पासिकास्थिशणबीजकुलत्थकोल-
क्वाथेन बस्तपिशितस्य रसेन वाऽपि ॥ ३११ ॥

शुण्ठ्या समागधिकया शतपुष्पया च
गन्धर्वमूलसपुनर्नवया सरण्या ।

---

१ 'तये' घ. । २ 'श्छागेन दुग्धेन तु' ख. । ३ 'दुग्धेन तु' । ४ 'मनायोक्तं' घ. । ५ 'मांसक्वाथं स' ख. । 'मांसीक्वाथेन' घ. । ६ 'युतेन' घ. । ७ 'नळ' ख. । ८ माषतैलयोगमिदं ख. घ. पुस्तकयोर्नोपलभ्यते ।

रास्नाबलामृतलतात्रिकटैर्विपक्वं
माषाख्यमेतदवबाहुकहारि तैलम् ॥ ३१२ ॥

अर्द्धांगशोषमपतानकमाढ्यवात-
माक्षेपकं सभुजकम्पशिरःप्रकम्पम् ।
नस्येन वस्तिविधिना परिषेचनेन
हन्यात् कटीजघनजानुरुजः समीरान् ॥ ३१३ ॥

तगरागरुकुंकुमकुन्दुरुभिः
सलवङ्गवराङ्गकुरङ्गमदैः ।
सरळामरदारुदळद्रविडी-
नखकेसररुक्फलिनीनळदैः ॥ ३१४ ॥

सतुरुष्कहरेणुबलाक्कथनै-
रिति तैलमिदं पयसा प्रपचेत्[1] ।
नृपतिप्रमदाशिशुभिः स्थविरै-
रुपयोज्यमिदं पवनापहरम् ॥ ३१५ ॥

इति वातामयचिकित्सा ॥

अथ कायचिकित्सा[2] ॥

एरण्डतैलं वृषणप्र[3]वृद्धौ
सगोपयस्कं हितमेतदुक्तम् ।
सराजवृक्षामृतवल्लिवाशा-
क्वाथो हितो मारुतशोणितेषु ॥ ३१६ ॥

मूत्रेण वा दुग्धसमन्वितं वा
सर्वोदरेषु श्वयथौ[4] प्रशस्तम् ।

---

१ 'विपचेत्' घ. । २ कायचिकित्साविभागोऽयमनन्तरोक्तवातामय-चिकित्सायाः पूर्वं दृश्यते ख. घ. पुस्तकयोः । ३ 'वृषणस्य' ख. । ४ 'च' ग. घ. ।

पक्वाशयस्थे पवने प्रयोज्य-
मेरण्डतैलं हि विरेचनार्थम् ॥ ३१७ ॥

मूत्रेण वर्षाभुसुरेन्द्रदारु-
पथ्यामृतानां क्वथनेन वाऽपि ।
पीतो जयेद्गुल्गुलुरेक एव
शोफं स[1]पाण्डूदरमेदुरत्वम् ॥ ३१८ ॥

मूत्रेण वा शोफिषु गुल्गुलुः स्या-
द्वायत्रिसारक्वथनेन कुष्ठे ।
मेदस्विनां चापि[2] हितः कषाये
बिल्वादिके वा शिखिमन्थजे वा ॥ ३१९ ॥

फलत्रिकक्काथयुतो व्रणेषु
कुष्ठेषु नाडीषु भगन्दरेषु ।
सकाञ्चनारत्रिफलोपकुल्याः
सगण्डमाला[3]गळगण्डरोगे ॥ ३२० ॥

वातामये विश्वबलागुळूची-
रास्नात्रिकण्टोरुबुकास्थिराभिः ।
छिन्नोद्भवक्काथयुतः समीरे
सशोणिते गुल्गुलुरेक एव ॥ ३२१ ॥

गुडाभया मूत्रहरीतकी वा
हितं[4] तथाऽरुष्करवर्द्धमानम् ।
अर्शस्सु मेहेषु हिता हरिद्रा
धात्रीरसे कुष्ठिषु मूत्रयुक्ता ॥ ३२२ ॥

अयस्कृतिर्वा खदिरस्य सार-
स्त्वग्दोषिणां श्वित्रविकारिणां च[5] ।

---

१ 'च' घ. । २ 'वाऽपि' ग. । ३ 'माले' ख. । ४ 'हिता' घ. ।
५ 'तु' ख. ।

अवल्गुजं बीजमुदाहरन्ति
विभीतकत्वङ्मलयूकषाये ॥ ३२३ ॥

गुल्मेषु शूलेषु च हिंगु युक्तं[1]
सविश्वसौवर्चलपुष्कराह्वम्[2] ।
गरातुरे हेम हितं वदन्ति
रास्ना मरुद्व्याधिहरा[3] प्रदिष्टा ॥ ३२४ ॥

उन्मादिनामुन्मदमानसाना-
मपस्मृतौ भूतहतात्मनां हि[4] ।
ब्राह्मीरसः स्यात् सवचः सकुष्ठः
सशङ्खपुष्पः ससुवर्णचूर्णः ॥ ३२५ ॥

वातासृजि श्लीपदिनां वमीषु
हलीमके पाण्डुषु कामलायाम् ।
मेदस्विनां वाऽपि[5] हिता गुडूची
फलत्रयं नेत्रविकारिणां च ॥ ३२६ ॥

हितोऽतिसारे कुटजो ज्वरेषु
सपर्पटश्चापि किराततिक्तः ।
समाक्षिकश्चापि सशर्करश्च[6]
वाशाकषायः खलु रक्तपित्ते ॥ ३२७ ॥

तृष्णासु पञ्चाम्लकमुद्दिशन्ति
प्लीहामये पिप्पलिवर्द्धमानम् ।
रोहीतकश्चापि यकृद्विकारे
स्याद्विद्रधीनां वरुणः प्रशस्तः ॥ ३२८ ॥

गोमूत्रमेकं जठरातुरेषु[7]
विषोपसृष्टेषु शिरीषकल्कः ।

---

१ 'योगः' ख. घ. । २ 'राह्वः' ख. घ. । ३ 'हरी' ग. । ४ 'च' घ. । ५ 'चापि' घ. । ६ 'सशर्करश्चापि समाक्षिकश्च' ख. घ. । ७ 'मयेषु' घ. ।

कोशातकी मूषकसम्भवेषु
विषेषु चाङ्कोलजटाकषायः ॥ ३२९ ॥

मन्याहनुश्रवणलोचननासिकास्य-
भ्रू[1]फाल'तालुगळशङ्खशिरोविकारान् ।
कृष्णा निहन्ति दशमूलकषायपीता
क्वाथेन वा सह फलत्रितयोद्भवेन ॥ ३३० ॥

रास्नाकषायपरिपीतमथ श्वदंष्ट्रा-
क्वाथेन वाऽमृतलताक्वथनेन वाऽपि ।
विश्वौषधं हरति पादकटीवि[2]भागा-
दासक्थि'जानुजघनस्थ[3]लजा रुजश्च' ॥ ३३१ ॥

पीतानि [4]'हिंगुसित'जीरकतुम्बरूणि
पथ्याग्निपुष्करजटालवणत्रयाणि ।
हृत्पृष्ठकोष्ठगुदगुह्यरुजो जयन्ति
संक्षिप्तमेतदिति कायचिकित्सितं हि ॥ ३३२ ॥

इति कायचिकित्सा ॥

शालाक्यतन्त्रम् ॥

नेत्रचिकित्सा ॥

ऊर्ध्वंगमाभिरुपगम्य शिरः सिराभि-
र्दोषाः स्वहेतुकुपिताः कफ[5]वातपित्ताः' ।
कण्ठोष्ठतालुरसनारदमूलकर्ण-
नासास्यलोचनशिरस्सु रुजः सृजन्ति ॥ ३३३ ॥

षट्सप्ततिर्लोचनजा विकारा-
स्तेषामभिष्यन्दसमुद्भवानाम् ।

---

१ 'भाग' ग. । २ 'विकारं मेदोस्थि' ख. । ३ 'रुजस्समस्ताः' घ. । ४ हिंग्वसित' ख. । ५ 'पित्तवाताः' ग. ।

श्लेष्माश्रयत्वा[1]दिति' लङ्घनं प्राक्
प्रशस्यते मुद्गरसौदनं च ॥ ३३४ ॥

आश्च्योतने सत्रिफला सलोध्रा
सचन्दना दारुनिशा प्रशस्ता ।
आलेपने [2]'गैरिकचन्दनं' च
सताक्ष्यशैलाभयमेतदिष्टम् ॥ ३३५ ॥

अतः परं च त्रिफलाकषायः
पाने पटोलादिफल[3]त्रिकाद्यैः' ।
[4]घृते हिते' कायविशोधनं च
सरक्तसंशोधनमञ्जनादि ॥ ३३६ ॥

[5]अब्द्रोणे' सपटोलनिंबकटुकात्रायन्तिका[6]चन्दनै'-
र्दार्वी[7]याष'वृषैः फलत्रयशतस्यार्द्धेन तुल्यैश्शृतैः ।
कृष्णा[8]चन्दनकौटजा'ब्दमधुकै[9]र्भूनिंबयुक्तैः शृतं
श्रोत्रघ्राणमुखाक्षिरुक्प्रशमनं सर्पिः पटोलादिकम् ॥ ३३७ ॥

पथ्याक्षामलकीजले पयसि च छागे [10]स'वाशारसे
भृङ्गस्य स्वरसे विपाचितमिति प्रोक्तैस्[10]सं' कल्कौषधैः ।
काकोळीत्रिफलामृतोत्पलकणाद्राक्षासितायष्टिका-
व्याघ्रीभिस्सह नेत्ररुक्प्रशमनं सर्पिर्महात्रैफलम्[11] ॥ ३३८ ॥

क्वाथेन कल्कविधिना च फल[12]त्रयस्य'
पक्वं घृतं जयति नेत्ररुजः समस्ताः ।

---

१ 'दति' घ. । २ 'चन्दनगैरिकं' ग. । ३ 'त्रिकाद्यं' घ. । ४ 'घृतं हितं' घ. । ५ 'साब्द्रोणैः ख. घ. । ६ 'पर्पटैः' घ. । ७ 'पाठ' ख. । ८ 'कौटजचन्दना' ख. घ. । ९ 'च' घ. । १० 'श्च' ग. घ. । ११ अस्याग्रे "इदं हि नक्तान्धतमिस्रमन्धताऽर्मार्माणि शुक्रं तिमिराणि हन्यात् । कफाच्च पित्ताच्च विबद्धदृष्टिमतः परं नास्ति दृगामयघ्नम्" इति घ. पुस्तकेऽधिकः पाठः । १२ 'त्रिकस्य' ख. घ. ।

कुष्ठप्रमेहमुखकर्णकपालनासा-
रोगान् भगन्दरगतिव्रणगण्डमालाः ॥ ३३९ ॥

स्निग्धं पटोलादिघृतेन पूर्वं
फलत्रिका[1]द्येन शृतेन' वाऽपि ।
नेत्रातुरं शुद्धविरिक्तरक्त-
मुपाचरेदञ्जनतर्पणाद्यैः ॥ ३४० ॥

तैलेन गव्यहविषा त्वथ माक्षिकेण
संयुक्तया त्रिफलया तिमिरामयेषु ।
वातादिजेषु भिषजः समुदाहरन्ति
संक्षेपतस्तिमिरभेषजमेत[2]दाहुः' ॥ ३४१ ॥

मरिचमागधिकासमनश्शिला-
जलधिफेनसकुंकुमशङ्खकैः ।
इति सन गर[3]पद्मकचन्दनैः'
पिचुमितैः [4]सरसा'ञ्जनशुक्तिभिः ॥ ३४२ ॥

तिमिरवर्त्मरु[5]गस्र'समन्वितं
[6]यदति'[7]कण्डुजवाकुल'तारकम् ।
मधुसमन्वितया [8]विरुजं' भवे-
त्तदनयाऽक्षि सुदर्शनयाऽञ्जितम् ॥ ३४३ ॥

भृङ्गोद्भवस्वरसभावितमाजदुग्धे
मूत्रे गवां पयसि च त्रिफलाकषाये ।
द्राक्षारसे च परिशुद्धमिति क्रमेण
सौवीरकाञ्जनमिदं तिमिरामयघ्नम् ॥ ३४४ ॥

---

१ 'काश्येन घृतेन' घ. । २ 'व दद्यात्' घ. । ३ 'चन्दनपद्मकैः' ख. घ. । ४ 'सुरसा' ख. । ५ 'गश्रु' घ. । ६ 'जयति' घ. । ७ 'कण्डुलकाकुल' ख. । 'कण्ड्वजकाकुल' घ. । ८ 'निरुजं' ख. घ. ।

आजं यकृद्गैरिकसम्प्रयुक्तं
किञ्जल्कमब्जादपि चोत्पलाञ्च ।
दिनान्ध्यनक्तान्ध्यहरी प्रदिष्टा
चतुर्भिरङ्गैरिति वर्तिरेषा ॥ ३४५ ॥

हरेणुकां सैन्धवसम्प्रयुक्तां
स्रोतोजयुक्तामुपकुल्यया च[1] ।
पिष्टाऽज[2]मूत्रेण कृता च वर्ति-
र्नक्तान्ध्यविध्वंसकरी नराणाम् ॥ ३४६ ॥

[3]सतार्क्ष्यशैलं त्रिकटु प्रदिष्टं
पिल्लापहं पिल्लगदातुराणाम् ।
समाक्षिकं चापि विभीतकस्य
बीजं जयेच्छुक्लमथापि ताम्यम् ॥ ३४७ ॥

[4]चन्दनसिन्धुसमुद्भवपथ्या-
किंशुकरक्तमिति क्रमवृद्धम् ।
क्षौद्रसमन्वितमञ्जनमक्ष्णोः
शुक्लरुगर्मगदादिविलेखि ॥ ३४८ ॥

नासारोगचिकित्सा ॥

हिंगुव्योषविडङ्गकट्फलवचारुक्तीक्ष्णगन्धायुतै-
र्लाक्षाश्वेतपुनर्नवैः कुटजजैः पुष्पोद्भवैः सौरसैः ।
इत्येभिः कटुतैलमेतदनले मन्दे समूत्रं श्रुतं
पीतं नासिकया यथाविधि भवेन्नासामयेभ्यो हितम् ॥ ३४९ ॥

१ 'वा' ख. । २ 'च' ख. । ३ 'सतार्क्ष्यबोलं' ख. । ४ 'सिन्धुसमुद्भवचन्दन' घ. ।

कर्णरोगचिकित्सा ॥

तैलं काञ्जिकबीजपूरकरसक्षौद्रैः सशुक्तैः शृतं[1]
स्यात् क्षौद्रार्द्रकशिग्रुमूलकदळीकन्दद्रवैर्वा समैः ।
शुण्ठीतुम्बरुहिंगुभिः शृतमथ स्यात् कर्णशूलापहं
सिद्धं विल्वगिरेण साज[2]पयसा मूत्रेण बाधिर्यजित् ॥ ३५० ॥

हिंग्वब्ददारुमिसिमूलकभस्मभूर्ज-
रुक्क्षारसिन्धुरुचकौद्भिदशिग्रुविश्वैः[3] ।
सस्वर्जिकाबिळवचाञ्जनमातुळुङ्ग-
रम्भारसैः समधुशुक्तमिदं विपक्वम् ॥ ३५१ ॥

तैलं प्रसिद्धमिति तच्छ्रवणस्रुतिघ्नं[4]
कर्णप्रणादबधिरत्वहरं नराणाम् ।
भ्रूमस्तकश्रवणशष्कुलिकान्तराळ-
शूलापहं चरकशास्त्र[5]चिकित्सितोक्तम् ॥ ३५२ ॥

मुखरोगचिकित्सा ॥

साब्द्रोणादरिमेदवल्कलशतात् क्वाथे चतुर्थांशके
गोदुग्धे सजतुद्रवे च विपचेदेभिश्च कल्कीकृतैः ।
पत्तङ्गागरुगैरिकैः सखदिरैः कङ्कोलजातीफलै-
र्न्यग्रोधैः सलवङ्गपुष्पजतुभिः कर्पूरलोद्ध्रान्वितैः ॥ ३५३ ॥

मंजिष्ठामधुकाब्दपद्मकतुटीत्वग्धातकीकेसरै-
स्तैलं कट्फलसंयुतैरिति भवेद्वक्त्रेण धार्यं नृभिः ।
शीतादादिषु दन्तजेषु मुखजेष्वन्येषु रोगेषु च
प्रोक्तं यज्जनकात्मजेन तदिदं दन्तप्रदं[6] प्राणिनाम् ॥ ३५४ ॥

---

१ 'शृतं सार्षपं' घ. । २ 'वारि' ख. ग. । ३ 'ग्रुविल्वैः' घ.
४ 'णामयघ्नं' ख. ग. । ५ 'सूक्त' ग. । ६ 'गुञ्जाप्रभं' ख. ग.

रोगेषु वक्त्रगळतालुसमुत्थितेषु
क्वाथः कटुत्रिकफलत्रिककट्फलानाम् ।
स्याद्वाऽथ[1] पर्पटककट्फलविश्वभार्ङ्गी-
पूतीकधान्यघनदारुवचाभयानाम् ॥ ३५५॥

शिरोरोगचिकित्सा ॥

द्रोणे जलस्य विपचेत् समयूरमांसं
वाट्यालकं सदशमूलमधूकरास्नम् ।
क्वाथेन तेन पयसा मधुरौषधैश्च
सिद्धं[2] शिरोरुजि हितं शिखिसर्पिरेतत् ॥ ३५६ ॥

मिसिमधुकविडङ्गैरण्डजीवन्तिरास्ना-
तगरलवणशुण्ठीत्वग्भिरेभिस्सदुग्धैः ।
दशभिरिति विभक्तैर्भृङ्गनिर्यासपक्वं
नयनदशनमूर्द्धव्याधिविध्वंसि तैलम् ॥ ३५७ ॥

असनसारकषायविपाचितं
त्रिफलया मधुकेन च संयुतम्[3] ।
भवति नावनतैलमनुत्तमं
पलितनेत्रविकाररुजापहम् ॥ ३५८ ॥

दुग्धेन मार्कवरसेन चतुर्गुणेन
तैलं शृतं त्रिफलया मधुकेन वाऽपि ।
नस्यप्रदानविधिना पलितानि हन्या-
दभ्यङ्गतः शिरसि वस्तिविधारणाच्च[4] ॥ ३५९ ॥

इति शालाक्यतन्त्रम् ॥

---

१ 'द्राश' घ. । २ 'पक्वं' ख. । ३ 'समन्वितं' ग. ।
४ 'णैश्च' ख. ।

अथ व्रणचिकित्सा ॥

वल्मीकिनां जतुमणौ मशकेष्वपच्या-
मर्शोविकारिषु भगन्दरिणां व्रणेषु ।
ग्रन्थ्यर्बुदश्वयथुरुक्तिलकाळकेषु
क्षाराग्निशस्त्रपतनानि वदन्ति वैद्याः ॥ ३६० ॥

दद्रूषु विद्रधिषु गुल्मिषु च[1] व्रणेषु
मक्कल्लपिल्लगळगण्डकिलासवत्सु ।
पामाप्रमेहपिटकासु विसर्पवत्सु
वर्त्मामयेषु च कपालविकारवत्सु ॥ ३६१ ॥

सश्लीपदे वृषणवृध्युपदंशशोफे[2]
शूकप्रदोषरुजि तालुगळामयेषु ।
क्षुद्रामयेषु[3] च[4] कियत्स्वपि[5] शोणितस्य
मोक्षः सिराभिरथ तुम्बविषाणिकाभिः[5] ॥ ३६२ ॥

दोषं प्रदेशं च बलं च वीक्ष्य
क्वचिज्जलौकाभिरसृग्विशुद्धिः ।
स्वल्पेऽसृजि स्यात् परिपाचनं च[6]
द्रवैरमीभिर्भिषजा विधेयम् ॥ ३६३ ॥

शिग्रुमूल[7]कफलैश्शणबीजै-
स्सक्तुभिश्च तिलसर्षपयुक्तैः ।
सातसीभिरिति पाचनपिण्ड-
स्तक्रकाञ्जिकयुतः श्वयथौ तु[8] ॥ ३६४ ॥

शोफं प्रपक्वं प्रविदार्य शस्त्रै-
र्विशोध्य संशुद्धिकरैः कषायैः ।

---

१ 'गुल्मिषु च विद्रधिषु' ग. । २ 'शोफ' ग. । ३ 'ष्वपि' घ. । ४ 'त्सु च' ग. घ. । ५ 'विषाणकैर्वा' ग. घ. ६ 'हि' ग. ७ 'बीज' घ. । ८ 'च' घ. ।

तिलप्रगाढैः पिचुमन्दपत्रै-
विंशुद्धपूयस्य ततः[1] प्ररोहः ॥ ३६५ ॥

निंबस्य पत्रैर्मधुना घृतेन
मिश्रीकृतैरस्य ततः प्ररोहः ।
सर्पिर्विमिश्रैर्यवसक्तुभिर्वा
प्ररोहणं वाऽप्यथ पञ्चकल्कैः ॥ ३६६ ॥

क्षुद्रामृताह्वृषनिंबपटोलपत्र-
क्वाथेन सत्रिकटुकत्रिफलापुरेण ।
सिद्धं घृतं व्रणभगन्दरगण्डमाला-
नाडीषु शस्तमिति गुल्गुलुतिक्तकाख्यम् ॥ ३६७ ॥

[2]द्रोणंपलाशकदळीखरमञ्जरीणां
क्षारस्य षड्भिरहिमैरुदकार्मणैस्तु ।
तावत् पचेद्भवति भस्मजलं च[3] याव-
त्तत् पिच्छिलाच्छमरुणं परिगृह्य यत्नात् ॥ ३६८ ॥

क्षौमेण कंबळिकया पटशाटकैर्वा
सूत्रावलोडितमथ स्रुतमम्बरेण ।
तत्तस्य शङ्खशकलस्य पलान्यथाष्टौ
क्षिप्त्वाऽत्र भस्मपयसि प्रतिपिष्टकल्कैः ॥ ३६९ ॥

दन्तीद्रवन्त्यतिविषाविडतालमूली-
कंकुष्ठरामठवचाचिरिविल्वपत्रैः ।
सस्वर्जिकाज्वलनलाङ्गलिकाह्वमूलै-
र्द्रव्यार्द्धपालिकमितैरिति सार्द्धमभिः ॥ ३७० ॥

संसाध्यते सु[4] भिषजा स तथा विपक्वः
क्षारो यथा भवति नैव तनुर्न सान्द्रः ।

---

१ 'सतः' ग. । २ क्षारपाकक्रमोऽयं वातामयचिकित्सायां दृश्यते ख. घ. पुस्तकयोः । ३ 'हि' ख. घ. । ४ 'तु' ख. घ. ।

'तेनेति'[1] साध्यविधिना न पुनर्भवन्ति
दग्धा रुजो नृषु नगा इव वज्रदग्धाः ॥ ३७१ ॥

इति व्रणचिकित्सा ॥

अथ भूतोन्मादचिकित्सा ॥

सिद्धार्थत्रिकटुक्षपायुगवचामंजिष्ठिकारामठ-
श्वेताह्वात्रिफलाकरंजकैटभी[2]'श्यामाशिरीषामरैः ।
इत्यष्टादशभिः श्रृतं घृतमिदं गोमूत्रयुक्तं नृणा-
मुन्मादघ्नमपस्मृतिघ्नमगदं स्याद् वस्तमूत्रेण वा[3]' ॥ ३७२ ॥

तालीसत्रिफलैलवालुफलिनीसौम्यापृथक्पर्णिनी-
दन्तीडाडिमदारुचन्दननिशादार्वीविशालोत्पलैः ।
जातीपुष्पहरेणुपद्मकयुतैर्जन्तुघ्नमंजिष्ठिका-
रुक्िसहीतुटिशारिबाद्वयनतैर्नागेन्द्रपुष्पान्वितैः ॥ ३७३ ॥

अष्टाविंशतिभिश्चतुर्गुणजले कल्याणमेभिः श्रृतं
हन्त्येतत्त्रिचतुर्थक[4]क्षत'मुरःकम्पं सवन्ध्यामयम् ।
सापस्मारगरोदराः सपवनोन्मादाः सजीर्णज्वरा
जायन्ते न पुनः कृतेन हविषा कल्याणकेनामुना ॥ ३७४ ॥

कौन्तीदारुमृगादनीविरहितैः कल्याणकोक्तौषधै-
रित्येभिस्त्रिफलैलवालुवियुतैः क्काथीकृतैरत्र च ।
निष्काथे मधुरौषधैश्च विपचेत् सर्पिः सदुग्धं पृथु
स्यात् कल्याणकमेतदेव हि रुजः कल्याणकोक्तान् जयेत् ॥३७५॥

काकोळीद्वयजीवकैः स[5]'वृ'षभैर्मेदाश्वगन्धासिता-
तिक्तारुक्सुरदारुहिंगुतगरैरेलावचाचन्दनैः ।

---

१ 'तेनैव' घ. । २ 'कुटजैः' घ. । ३ 'तु' घ. । ४ 'ज्वर' ख. घ. । ५ 'स ऋ' घ. ।

जीवन्तीत्रिफलाजमोदरजनीदार्वीविदारीवरी-
मञ्जिष्ठाघनपद्मकैः समधुकैर्मृद्वीकया संयुतैः ॥ ३७६ ॥

एभिः क्षीरचतुर्गुणं शृतमिदं सर्पिः सदा शस्यते
बालस्य ग्रहपीडितस्य पुरुषस्याल्पस्रव[1]द्रेतसः ।
एतन्मारुतरोगिणामपि हितं पुत्रार्थिभिः स्त्रीजनै-
रूर्ध्वाधःकृतशुद्धिभिः फलघृतं संसेव्यते सर्वदा ॥ ३७७ ॥

भार्ङ्गीफल्गुफलत्रिकद्विपकणाशम्याकशक्रद्रुम-
त्वङ्[2]मूर्वा[2]दशमूल[3]मोरट[3]जटासप्तच्छदत्वक्तुला ।
निष्काथ्या सलिलार्मणेन शुचिना क्काथे च पादस्थिते
गोमूत्रेण सगोशकृद्रसदधिक्षीरेण सर्पिः पचेत् ॥ ३७८ ॥

सव्योषैः सवचाविळङ्गहुतभुग्भूनिंबतिक्तात्रिवृत्-
पाठापुष्करशारिबाळ्यनिशायुग्यष्टिका[4]वाशकैः ।
पूतीकच्छदनीलिनीफलयुतैः स्यात् पञ्चगव्यं पृथु
श्वासापस्मृतिरुक्प्रमेहपिटकाजीर्णज्वरोन्मादजि[5]त् ॥ ३७९ ॥

सभेकपर्णीस्वरसं सरुग्वचं
सशङ्खपुष्पीकमिदं हविः शृतम् ।
तदेतदुन्मादवतामभेधसा-
मपस्मृतौ दर्दुरपर्णिकाघृतम् ॥ ३८० ॥

पाठावचामरिचमागधिकाभयाभिः
सिन्धूत्थविश्वमधुशिग्रुसमन्विताभिः ।
सारस्वतं घृतमजापयसा विपक्वं
पथ्यं भवेदवचसां जळगद्गदानाम् ॥ ३८१ ॥

रुक्सल्लकीगुल्गुलुचोरकोग्रा-
प्रियंगुदेवद्रुमकुन्दरूणि ।

---

१ 'द्रव' घ. । २ 'त्वग्दूर्वा' घ. ३ 'चोरक' घ. । ४ 'पद्मकैः' घ. । ५ 'नुत्' ख. घ. ।

मुराद्वयं धूपवरो दशाङ्गः
सौभाग्यकारी भृगुजोपदिष्टः ॥ ३८२ ॥

शैलेयगुल्गुलुदलैः समुराप्रचण्डा-
द्रव्यापहृत्सुरसकुन्दरुभिः सकुष्ठैः ।
सध्यामकैरिति सुगन्धरसैश्च धूपः
सौभाग्यकृद्विजयकृज्जयकृद्वि[1]वादे ॥ ३८३ ॥

देवासुरोरगपिशाचपितृग्रहेषु
गन्धर्वयक्षपिशिताशिशिशुग्रहेषु ।
जीर्णज्वरेषु[2] विहितः सविषातुरेषु
धूपोऽयमाजिविजयार्थिषु पार्थिवेषु ॥ ३८४ ॥

इति भूतविद्या ॥

अथ बालचिकित्सा ॥

लोध्रवारणकणे सवाळके
बालके हिततमेऽतिसारिणि[3] ।
धातकीकुसुमसंयुतोऽपि वा
श्रीफलस्य च गिरः समाक्षिकः[4] ॥ ३८५ ॥

जातीप्रवाळकुसुमानि समाक्षिकाणि
योज्यानि बालकजनस्य मुखप्रपाके ।
पाके गुदस्य च रसाञ्जनमम्बुपिष्टं[5]
दृष्टं[6] भिषग्भिरुपदिष्टमिदं जनानाम् ॥ ३८६ ॥

सातिविषा सकुलीरविषाणा
मागधिका मधुना समवेता[7] ।

---

१ 'द्विजयो वि' ख. घ. । २ 'भूतातुरेषु' घ. । ३ 'तमे समाक्षिके । धातकीकुसुमविल्वसंयुते क्वाथलेहविधिनाऽतिसारिणि' ॥ ख. । ४ 'रसः समाक्षिकः' घ. । ५ 'पिष्टमिष्टं' ख. । ६ 'शिष्टं' ख. । ७ 'च समेता' घ. ।

छर्दिहरी कथिता त्वथ कृष्णा
कासहरी ज्वरजिच्च शिशूनाम् ॥ ३८७ ॥

इति कौमारतन्त्रम् ॥

अथ विषचिकित्सा ॥

गोमूत्रपीता रजनीशिरीष-
त्वगादिभिर्वा कथितैः प्रपीता ।
सजङ्गमं स्थावरमाशु हन्या-
द्विषं विषोपप्लुतमानसानाम् ॥ ३८८ ॥

कपित्थकाश्मर्यशिरीषधात्री-
पुष्पाणि पिष्ट्वा सलिलैरनुष्णैः ।
पीतानि सर्पस्य विषं निहन्यु-
र्विषं[1] महन्मण्डलिनां सकष्टम्' ॥ ३८९ ॥

त्वक्सप्तपर्णात् कुटजात् सनिंबा-
द्द्बामयोशीरनतानि तार्क्ष्यम् ।
लोध्रं विदध्यान्नवमन्नवाङ्गं
प्रचेतसा चूर्णमिदं प्रदिष्टम् ॥ ३९० ॥

[2]लोहेऽथ रुक्मेऽप्यथ' राजतेऽथ[3]'
स्थितं सदा सद्मनि भूपतीनाम् ।
क्षौद्रेण लीढं[4]' सचराचराणि[5]'
विषाणि हन्याद्भुवि मानुषाणाम्[6]' ॥ ३९१ ॥

कपोतविण्मर्त्यशिरोरुहाणि
सगोविषाणं शिखिपिञ्छकाग्रम् ।

---

१ 'महामण्डलिनं च कृत्स्नम्' घ. । २ 'लौहेऽथ हैमे त्वथ' घ. । ३ 'वा' घ. । ४ 'पीतं' ख. । ५ 'चराणां' घ. । ६ 'मानवानां' ख. ।

यवस्य धान्यस्य तुषाश्च बीजं
कार्पासिजं चाघ्यु[1]षिताऽथ माला ॥ ३९२ ॥

इत्यौषधीभिः परिकल्पितोऽयं
धूपोऽगदः स्याद्भुजगाखुयुक्ते ।
गृहे विधेयः कुशलैरनेन
नश्यन्ति सर्पाश्च तथाऽऽखवश्च ॥ ३९३ ॥

श्लेष्मातकत्वक्क्षवकं[2] गुडूची
नृपद्रुमत्वग्बृहतीद्वयञ्च ।
एषोऽगदः सर्वविषा[3]णि हन्या-
दास्तीकनाम्ना मुनिना प्रणीतः ॥ ३९४ ॥

कुष्ठं वचामदनकोशवतीफ[4]लैश्च
संयोजितं तदिह चूर्णमिदं चतुर्णाम् ।
गोमूत्रपीतमखिलाखु[5]विषं निहं[6]न्यात्
कोशातकीक्कथनमापिबतोऽथवाऽपि ॥ ३९५ ॥

तैलार्कदुग्धपललैः सगुडैरमीभि-
र्योगैः समैरिति चतुर्भिरलर्कदष्टे ।
स्यात् सारमेयविषहा शरपुङ्ख्या वा
धत्तूरबीजयुतपिष्टकपिप्पली वा ॥ ३९६ ॥

इति विषतन्त्रम् ॥

अथ रसायनतन्त्रम् ॥

सततमरुष्करपिप्पलिवृद्धं[7]
वपुंषि निरामयतां विदधाति ।

---

१ 'वाऽप्यु' घ. । २ 'रुचकं' ख. । ३ 'षापहः स्या' घ. । ४ 'फलेन' घ. । ५ 'खुविषाणि हन्ति' घ. । ६ 'हन्ति' ख. । ७ 'वृद्धि-र्वपु' ग. घ. ।

कनकशिलाजतुगुग्गुलुधात्री-
फललशुनत्रिफलाविधयश्च ॥ ३९७ ॥

घृतमधुदुग्धपयोदधिमण्डै-
रुषसि कृतः करिकर्णपलाशः ।
स्थगयति हि स्थिरता स्थविराणा-
मपि विदधाति वपुर्बलवत्ताम् ॥ ३९८ ॥

एरण्डतैलमथ निंबफलास्थितैल-
मेतद्रसायनमनामयकायकारि ।
ज्योतिष्मतीफलपलाशफलोद्भवञ्च
तैलं वलीपलितहारि भिषक्प्रदिष्टम् ॥ ३९९ ॥

धात्रीफलानि पयसाऽसनवारिणा वा
स्विन्नानि यः शिशिरकालसमुद्भवानि ।
निष्केवलान्यथ तिलैरसितैः समानि
खादेदनामयवपुः स पुमान् स्थिरायुः[1] ॥ ४०० ॥

ससितया वचयाऽमलकैरथ
त्रिफलयाऽथ घृतव्यतिमिश्रया ।
सुकनकस्य[2] रजः सततं कृतं
परमिदं हि रसायनमुच्यते ॥ ४०१ ॥

इति रसायनतन्त्रम् ॥

अथ वाजीकरणतन्त्रम् ॥

शतावरीनागबलाविदारिका-
त्रिकण्टकैरामलकीफलान्वितैः ।

---

१ श्लोकोऽयं ख. पुस्तके नास्ति । २ 'शतायुः' ख. घ. ।
३ 'कनकसूक्ष्म' ख. ।

विचूर्णितैः पञ्चभिरेकशः पृथक्
प्रकल्पितैर्वा घृतमाक्षिकप्लुतैः ॥ ४०२ ॥

इति प्रयोगाः षडिमे भिषग्वरै-
रुदीरिताः शर्करया समायुताः[1] ।
नृणामनेकप्रमदाप्रसर्पिणां[2]
प्रधानधातोरतिरेककारिणः ॥ ४०३ ॥

सघृतमधुबलात्रयस्य चूर्णं
समधुसिताघृतमुच्चटोद्भवं च ।
समधुकमधु मुद्गमाषपर्ण्यो-
रमृतलतामलकत्रिकण्टकोत्थम् ॥ ४०४ ॥

इति कथितमिदं हि पुष्पिताग्रा-
चरणचतुष्टयवेष्टनेन शिष्टैः ।
अभिमतमसकृद्व्यवायभाजा-
मिह खलु योगचतुष्कमाकलय्य ॥ ४०५ ॥

पिबति यः पयसा कृतशोधन-
स्त्रिकटकं मधुकं बहुपत्रिकाम्[3] ।
अतिबलामथ नागबलां बला-
मिह हि नागबलः स पुमान् भवेत् ॥ ४०६ ॥

[4]एषा चिकित्साकलिका सदर्थ-
गन्धा भिषक्षट्पदवृन्दसेव्या ।
निरूपिता वृत्तशतैश्चतुर्भि-
र्योगैः स्रगञ्जैरिव तीसटेन ॥ ४०७ ॥

---

१ 'समन्विताः' घ. । २ 'दोप' ख. । ३ 'पुत्रिकां' ख. ।
४ एतच्छ्लोकद्वयं ग. पुस्तके नास्ति ।

जाता[1] विशाला बहुसुश्रुतादि-
शास्त्रोद[2]धैर्योग विशेषरत्नैः ।
आस्तां चिरं सद्गुण[3]कण्ठिकेव
कण्ठे स्थिता वैद्यमहीपतीनाम् ॥ ४०८ ॥

इति वाजीकरणतन्त्रम् ॥

चिकित्साकलिका
समाप्ता ॥

---

१ 'जातैः' ख. । २ 'दधौ योग' ख. । ३ 'कर्णिकेव कर्णे' घ. ।